UNIVERSITY OF DELHI
विद्या धृति सत्यम्

DELHI UNIVERSITY
LIBRARY

DELHI UNIVERSITY LIBRARY

Cl. No. O15:2MK0:1 E5

Ac. No. 130025 Date of release for loan
19 FEB 1964

This book should be returned on or before the date last stamped below. An overdue charge of 0.6 nP. will be charged for each day the book is kept overtime.

# विटराजविजयं

कोटिलिङ्गपुरकोच्चुण्णिराजविरचितः ।

पि. एस्. अनन्तनारायणशास्त्रिणा
टिप्पणीसंकलनपूर्वकं
प्रसाधितः ॥

[ Copyright ]

THE MANGALODAYAM CO., LTD.,

K. K. PRESS,

TRICHUR.

[ Price 6 Annas ]

# शुद्धपत्रम् ।

| पृष्ठं | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १२ | ३ | राया यदुन्मत्ता | रा यदुन्मत्तात्मा । |
| ६० | १९ | अङ्गीकृता वयमधःकृतासिन्धुपुत्र्या | अङ्गीकृतानि वयमब्धिसुताजयिन्या । |

# विटराजविजयः ।

यस्मै चन्द्रार्द्धमौलिः स्पृहयति भगवान् किं च यद्वासगेह-
द्वारे पीयूषसारो बहिरधरतले भृत्यवन्नित्यमास्ते ।
रक्तः शृंगारसारस्तुहिनगिरिसुतावक्त्रवीटीरसोऽति-
स्फूर्जन्माधुर्यपूर्णः सुरभिरिह गिरां हृद्यतां नः प्रदद्यात् ॥

किं च ।

गंभीरस्निग्धघोषो जयति गणपतेः कर्णताळः स शम्भो-
र्नृत्ते मन्दाक्षनन्दं हरिमपि रचयन् दुन्दुभिं ताडयन्तम् ।
यद्वातो दानधाराव्यतिकरसुरभिर्नृत्यदीशानखेद-
स्वेदच्छेदी विधत्ते प्रणतहृदि सुखाम्भोधिमुद्वेलमुच्चैः ॥ २ ॥

किं च ।

कामान्तकः प्रणतकामसहस्रदायी
युक्तः सदा त्रिपुरया त्रिपुरान्तकारी ।
एवं परस्परविचित्रचरित्रचित्रो
जीयान् स भूरिकरुणस्तरुणेन्दुमौलिः ॥ ३ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—वशीकुर्वन् सर्वं भुवनवलयं शात्रवलयं
वितन्वंस्तन्वंगीरातिसुहृदनंगो विजयते ।
मुनीनां निर्लीनो मनसि भयतः काननजुषां
यदीयारिर्देवः सितकिरणचूडः स च मृडः ॥ ४ ॥

(सानन्दम्)

सर्वेषां दयितं कळेबरमिदं सर्वार्थसंसाधकं
यस्माज्जातमिहानुभूतिसमये यन्निस्तुलानन्ददम् ।
तद्ब्रह्मप्रतिमं घनस्तनतटीसम्मर्दनार्द्रात्मनां
नारीणां सुरतं सुखाय सततं भक्त्या दृढं भावये ॥ ५ ॥

(पुरतो विलोक्य—सबहुमानहर्षम्)

कस्तूरीघनसारलेपसरसा जातीसुमालङ्कृताः
सौन्दर्यादिगुणोज्वलाः स्मरमहाशास्त्रप्रतिष्ठापकाः ।
कान्तानां घनपीवरस्तनतटीमध्यं विमुच्यादराद्
यूयं चात्र यदागता रसविदस्तस्मात् कृतार्थो वयम् ॥ ६ ॥

(नेपथ्याभिमुखमवलोक्य—) मारिष ! इत आगम्यताम्

(प्रविश्य)

पारिपार्श्वकः भाव ! अयमागतोऽस्मि । भवदीयाज्ञासुधापानकौतूहलिनीयं मामकश्रवणयुगळी ।

सू—श्रीकुलशेखरपुरालयस्य सकललोकनाथस्य लक्ष्मीनाथस्य यात्रायां समागता एते विद्वांसः साद्रमस्माभिः शृङ्गाररसोत्कटया नाट्यविद्ययोपासनीयाः । यदेतेषां हृदयान्यालंबते त्रिलोकविजयी भगवान् मन्मथः ।

पारि— केवलशृङ्गाररसमग्नानाममीषां सुमनसामुल्लासाय ऋतुषु वसन्त इव रूपकेषु "भाण" एव समर्थः स्यादिति मम मनीषा ।

सू— सत्यमेवेदम् । समुचितज्ञोऽसि ।

पा— भाणेषु च केन निर्मितः प्रयोक्तव्यः ? ।

सू— (विचार्य)

"इक्कावा"ख्यमहीश्वरीप्रियसुतः "कुञ्ञुण्णि" धात्रीपतेः
शिष्यः साम्प्रत"मिक्कु"माटधरणीनाथाकृपैकास्पदम् ।
श्रीकालीपदपद्मनित्यभजने सक्ताशयः सद्यशाः
शास्त्रज्ञः सुमहाकविर्विजयते कोच्चुण्णिभूपः क्षितौ ॥ ७ ॥

पा— अस्य कीदृग्गुणा वाणी ?

सू— माधुर्यैकनिधानमर्थभरितं कोच्चुण्णिधात्रीपते-
र्नार्यश्चापि नराश्च सूक्तमनिशं जल्पन्त्यनल्पं मुखैः ।
तस्मात् पाठविधौ तदक्षरगलत्पीयूषसम्मेळना-
देतेषां मधुरोऽधिकं मधुसितादिभ्योऽपि जातोऽधरः ॥ ८ ॥

तत्प्रणीतं "विटराजविजयाख्यं"भाणमत्र प्रयोक्तुमुचितम् ।

पा— यद्रोचते भावाय ।

सू— विमलरससुलाळितायां
वेश्यायामिव मदीयविद्यायाम् ।
पश्य विटा इव सभ्याः
परमनुरज्यन्त्यमी रसाभिज्ञाः ॥ ९ ॥

तत्तथा कुरु, यथामीषां सामाजिकानां क्षणमपि न वैमनस्यं भवति ।

प्रा— तथेति (निष्क्रान्तः

सू—(सर्वतोविलोक्य सहर्षम्) हो भाग्यादिदानीं पश्यामि सकल-हृदयमेदुरामोददायिनं मदनबान्धवमुमारामवीथीषु निवसन्तं वसन्तम् । अधुना हि—

झङ्कुर्वन् मुखवायुनैव कलिकाः काले समुल्लासय-
न्नाविश्यान्तरमादरेण शनकैः साध्वीं च माध्वीं पिबन् ।
यूनो दर्शयति द्विरेफनिकरो मुग्धोपभोगक्रमं
श्लाघन्ते तदिदं विलोक्य पवनाधूतैः शिरोभिर्द्रुमाः ॥ १० ॥

अपि च ।

पवनसंगतवञ्जुळवल्लरी
परिमळाञ्चितमञ्जुळमञ्जरी ।
किरति शोणरजः प्रियराम्भिता
कुचतटी सुदृशामिव कुङ्कुमम् ॥ ११ ॥

अपि च ।

माकन्देन मदान्धकोकिलजुषा मन्दानिलो मल्लिका-
वल्लीं योजयितुं वधूमिव विटः पुंसायमागच्छति ।
एतत्सङ्गवशादियं सुमरसानारामवाटी बहून्
मुञ्चत्यद्य विलोलकोमळतनुः स्वेदान् परस्त्री यथा ॥ १२ ॥

तदहमप्यनन्तरकरणीयाय सज्जीभवामि । इति (निष्क्रान्तः)

प्रस्तावना ॥

(ततः प्रविशति दयितापरिरम्भं नाटयन् विटः) ।

विटः (सानन्दम्) ।

खिन्नाङ्गी मद्घनालिङ्गनजनितमुदा शीतशीतं श्वसन्ती
मोदाश्रुच्छन्ननेत्रा पुलकचिततनुः सद्य एवाद्य तन्वी ।
एषा मे तापभारं हरति जलकणोद्गारिणी शीतवाता
वर्षावेलेव तोयस्थगितसलिलजानीपसत्कुड्मलाढ्या ॥ १३ ॥

(पुनः प्रियामवलोक्य)

अन्तःप्रपूर्णामिदमश्रुमिषादिदानीं
मोदामृतं गळदवेक्ष्य बहिर्विवृद्धम् ।
तस्मै प्रदातुमवकाशमिवातितन्वी
तन्व्यास्तनुर्व्रजति पीवरताममुष्याः ॥ १४ ॥

अद्य मद्गात्रस्पर्शनध्वस्तशोकां लब्धसंज्ञामिमां सामभिः सान्त्वयित्वा राजकार्यं घटयितुमेव गच्छामि ।

(प्रकाशम्) अयि प्रियतमे ! शृङ्गारलहरि !

(स्वगतम्) इदानीमपीयं विसंज्ञा जाता महानन्देन यत्किमपि न जल्पति (नाट्येन तदाश्लेषमुन्मुच्य) चिरादद्यैषा लब्धसंज्ञा जाता—— तथा हि——

अस्याश्चैतन्योदय-
मक्षि,समुन्मीलितं स्फुटं वक्ति ।
विकसति न जातु पद्मं
विनार्कबिम्बोदयं नूनम् ॥ १५ ॥

किं वदसि ?

"मुख्योऽप्रियेषु मम ते क्षणविप्रयोग-
स्तद्वत् प्रियेषु तु भवत्परिरम्भ एव ॥

एतद्द्वयं च वरमद्य मयानुभूतं
कं वा तयोरिह विधास्यति मे विधाता" ॥ १६ ॥

दूति—(स्वगतम्) एतादृशप्रणयशालिनीमिमां कथमहं मुञ्चामि—कथं वा सुस्निग्धस्य महाराजस्य कार्यं साधयितुं न गच्छामि—नन्वेवं भणामि—(प्रकाशम्)

त्वमसि सदा मम हृदये
त्वदाशयेऽहं च तन्वि! सन्निहितः।
कुत्रावयोर्वियोगः
कुतः पुनस्त्वं बिभेषि मुग्धेव ॥ १७ ॥

तदिदानीमेव गन्तुमनुज्ञां देहि—योजनीयाद्यानन्दवल्ली त्वत्सखी मया महाराजेन। (स्वगतम्) अथेयमश्रुपूर्णमुखी मौनानुवादं ददाति।

(मन्दं मन्दं कतिचित्पदानि गच्छन् वलितकन्धरं मुहुः पृष्ठतो विलोक्य सशोकम्)

यात्रोन्मुखस्य मम नालिकळस्वना, न
मन्दानिला, न सुमसायकसायकाश्च।
किन्त्वेतदद्य कुरुते कलुषाश्रुमग्न-
मस्या विलोकितमधीरमधीरभावम् ॥ १८ ॥

(मुहुर्निश्वस्य कथञ्चित् परिक्रम्य) सम्प्रति सकलचक्रवाकचक्रक्रमणहेतुः काल्यं समुल्लसति। अद्यहि—

शिशिरकरसमीरबाधितानां
मिह समुद्भवति कळी शुकानाम्।

निजरमणवियोगमूर्छिताश्चः-
पतदबलामणिकङ्कणप्रणादैः ॥ १९ ॥

(प्रतीचीमवलोक्य)

भगिन्याः पुत्रस्य त्रिभुवनजये पुष्पधनुषः
सहायं कृत्वायं जलनिधिभवः कर्म शशभृत् ।
समुद्रान्तस्थां तां तनयविजयं तस्य जननीं
रमां वक्तुं नूनं जलनिधिमिदानीं प्रविशति ॥ २० ॥

(प्राचीमवलोक्य)

सुभगललिते कान्ते देशान्तरं रजनीकरे
गतवति वियल्लक्ष्मीं तारालिहारविवर्जिताम् ।
प्रकटितसमस्ताशां कुर्वन्नयं मदनानलः
सपदि तपनव्याजात् सन्तापयन् समुदञ्चति ॥ २१ ॥

(परितो विलोक्य सशोकम्)

उग्रः पुत्रोऽपि यस्य प्रबलतरकरोत्कम्पितोचण्डदण्डः
प्राणान् नृणामशङ्कं हरति हि कलया लीलया कालनामा ।
सोऽयं कोपारुणाङ्गः स्फुटमिह तपनो लक्ष्यते तीक्ष्णतेजाः
कावाऽस्माकं कथातः परमिति तरुणा हन्त! गच्छन्ति मूर्छाम् ॥ २२ ॥

अपि च ।

उन्निद्राणि निजप्रभाप्रशमने दक्षाणि वीक्ष्याङ्गना-
नेत्राण्यद्य नवोत्पलानि मुकुलीभूतानि भीतान्यहो ।
एतासां तु मुखानि कान्तविरहक्लान्तानि दृष्ट्वा पुनः
पाथोजानि हसन्ति हन्त ! विलसद्भृङ्गालिकोलाहलम् ॥ २३ ॥

इदानीमेव स्नानालंकरणादिकं सर्वं करोमि ।

(इति परिक्रम्य नाट्येन तथा कृत्वा—आत्मानमवलोक्य)

कण्ठे माणिक्यमाला कनकमणिमयान्यङ्गुलीष्वङ्गुलीया-
न्यंसे सौवर्णलेखारुचिररुचिरतरं कुन्दशुभ्रं दुकूलम् ।
कट्यां हैमं च सूत्रं कमलमृदुलयोः पादयोःपादुके मे
शोभां कुर्वन्ति दण्डोऽप्यधिकरमहितौघेष्वदान्तोपि दान्तः ॥ २४ ॥

अद्य तावदविळम्बितमेवानन्दवल्लीस्वयंवरप्रत्यूहं तमुन्मूलयितुं महाराजमन्त्रिणं सुभगदीपं द्रष्टुं गच्छामि ।

(इति परिक्रामन् पुरतो विलोक्य) अये शोभनमिदं निमित्तम् ।
तथा हि—

वीक्ष्यान्यासां कुचादावतिरतिजनितं लक्ष्म मुग्धं हसन्त्यः
पश्चात् स्वस्यापि लज्जाभरतरळदृशो मन्दमायान्ति वेश्याः ।
यासां हासप्रकाशैर्धवळमखिलदिग्व्यापिभिः सूर्यमिन्दुं
मत्वा मूर्छन्ति पान्थाः कथमपि गमितामेययामत्रियामाः ॥ २५ ॥

अधुनैता बाला मामवलोक्य नखव्रणादीनि सुरतचिह्नान्यशेषेण निगूहितुमपारयन्त्यो लज्जानतमनोहराननाः तिष्ठन्ति । तदेवं वदामि (उपसृत्य) अनुचितेयं लज्जा युष्माकम् ।

यतः—

लज्जा तु कर्मणि जनस्य भवत्ययुक्ते
तन्नैव किञ्चन कृतं भवतीभिरत्र ।
आत्मप्रियारुणनखाङ्कुरदत्तशोण-
माणिक्यहारवहनं त्वतियुक्तमेतत् ॥ २६ ॥

(स्वगतम्) बाल्यादसौ लज्जा चाटुभिर्नापसरति । तदद्य ज्ञातमपि प्रस्तुतान्तरं पृच्छामि । (प्रकाशम्) किमर्थोयं भवतीनां दिनारम्भ एव स्नानारम्भः? किं वदथ? "आनन्दवल्लीस्वयंवरमहोत्सवसंभारसंभरणाय" इति । उचितमेवेदम् । वक्षोजकुम्भोरुरम्भास्तम्भादिभिः स्वावयवैरेवानायासेन तत्स्वयंवरमण्डपं मण्डयितुं गच्छन्तु भवत्यः। अहमपि साधयामि। (इति परिक्रम्य विलोक्य सानन्दाद्भुतम्)

इयं तावदिळाचरलोचनागोचराग्रस्फटिकरम्यहर्म्यश्रेणीनिरन्तरपार्श्वद्वया, वारनारीवराङ्गपरिमळलोभमिळदाळिपटलीकळकळमांसळितमङ्गळमृदङ्गवेणुवीणामणिकिङ्किणीकटकादिप्रणादकबळितेतरशब्दा, कामिनीकमनीयकुचकलशपरिलिप्तकुङ्कुमरेणूत्किरणनिपुणचन्दनागिरिमन्दानिलालिङ्गनप्रकटितरागसरसविटजननिषेविता, कन्दुकलीलाप्रसक्तवरवर्णिनीसुवर्णकुण्डलवलयादिभूषणनिचयखचितमणिगणरुचिररुचिरचितवलभिकापरिचित्रितवलभीविचित्रा, सौधोपरिस्थितस्त्रीपुंसपरस्परसरससल्लापवेलासमुल्लसितसितहासितप्रभाविरचितधवळवासोवितानरमणीयमध्योर्ध्वसरणिः, मणिमञ्जुळपञ्जरस्थितशुकशारिकामधुरतरसल्लापश्रवणजातविस्मयस्तिमितागन्तुकजनसंभाव्यमाना, वसन्तश्रीसमलङ्कृतमनोरमारामद्रुमसन्दोहनिष्यन्दिमकरन्दलहरीपूरितपद्मिनीपरिशोभितपर्यन्तभागा, जातीकमलकल्हारमल्लिकाचम्पकाशोकादिकुसुमनीरन्ध्रितमार्गा, मध्याविराजद्गिरिशालयनिलयगिरिजाप्रसादमसृणकटाक्षकल्लोलपरिपतंतंपरिम्लक्षितमाहात्म्यमदनाराधनानि-

स्तन्याबालवृद्धा, सकलगुणसमृद्धा, कामगोष्ठीति प्रसिद्धा, वेशवीथी विलोक्यते ।

भ्रमरामिव तत्र तत्र
भ्रमन्तमबलालतोष्ठमणिलोभात् ।
सुभगामिह सुभगदीपं
द्रष्टुं प्रविशामि वेशवाटममुम् ॥ २७ ॥

(इति परिक्रम्य—दक्षिणतो विलोक्य—) इदमस्मन्मोदसागरचन्द्रिकाया ललितचन्द्रिकाया भवनम् । तदन्तः प्रविशामीति । (प्रविश्य गवाक्षद्वारेण वीक्ष्य—सानन्दम्)

विन्यस्तदृष्टिरिह चित्रपटे प्रफुल्ल-
वक्त्राम्बुजा वसति वासगृहे प्रियेयम् ।
स्नानोद्यतात्मवचनाश्रवणेन सख्या
जातासि हन्त! बधिरेति च हास्यमाना ॥ २८ ॥

(सवितर्कम्—) किमियमेवं चित्रपटे पश्यति? । प्रविश्य ज्ञास्यामीति (प्रविश्य—विलोक्य) इयमद्य सखीपाणिपल्लवप्रचलिताङ्गवल्ली सुप्तोत्थितेव दिशो विदिशश्च पश्यति । इदानीं तु—

दृष्ट्वा मां गळदुत्तरीयवसनच्छन्ने तु चित्रे हठा-
दाकृष्यात्मसखीघनस्तनतटाद्वारुत्तरीयं पुनः ।
आच्छाद्य स्तनकुट्मलौ पुळकिताखिलांगवल्ली मद-
लोलाम्बुप्रतिबिम्बिताम्बुजलसदृष्टिः समुत्तिष्ठति ॥ २९ ॥

(उपसृत्य) उपविशतं युवाम् । चकोरिके! किं वदसि? "आ-

व! भवानमुमलङ्करोतु सिंहासन"मिति । (तथा कृत्वा—स्वगतम्) इमे उपविष्टे । (ललितचन्द्रिकां विलोक्य)

अन्तश्शोकं कथयति कृशं सुन्दराङ्ग्याः शरीरं
निर्भिन्नत्वं निगदतितरां नेत्रयुग्मं विवर्णम् ।
अस्याः फुल्लाम्बुजचलदृशो हन्त! मत्स्वान्तहर्म्या-
श्चेतोहर्ता जयति पुरुषः को नु पुष्पास्त्रदैवम् ॥ ३० ॥

अस्त्वेवं पृच्छामि । (प्रकाशम्) किमस्मिंश्चित्रपटे? (स्वगतम्) ललितचन्द्रिका अश्रुर्तिं नाटयति । किं च—

दातुं ममोत्तरमिवोच्चलिताधरोष्ठी-
मावृत्य वक्त्रमियमाशु सखीं रुणद्धि ।
कण्डूयनच्छलविषक्तकराब्जशाखा-
च्छन्नेन कुञ्चितनतभ्रु दृगञ्चलेन ॥ ३१ ॥

(प्रकाशम्) चकोरिके! किं वदसि? । "अनया लिखितं भावस्य रूप"मिति । (स्वगतम्) मदनुकूल एव सर्वदा मदनः (पुनः ललितचन्द्रिकामुखं निरूप्य)

अग्रेतस्या वयस्याकृतपरुषरुषः स्वेदलेशैर्विचित्रं
किञ्चिद्भ्रूभङ्गरम्यं सितरदनशिखादष्टबिंबाधरान्तम् ।
उद्यत्पूर्णेन्दुकान्तं मुखमिदमरुणापाङ्गमालोकितुं मे
मन्दायुर्वाञ्छतोऽग्रे सपदि नमयति ह्रीरहं किं करोमि ॥ ३२ ॥

सखि! चकोरिके! उन्मत्तायास्तवान्तिके कथमहं तिष्ठामि इति ललितचन्द्रिका हन्त! गन्तुमुद्यतैव । (सहर्षम्) जनन्या स-

पे नेदानीमितस्त्वया गन्तव्यमिति चकोरिकाशपथवचनेनानिय-न्त्रिता निगळबद्धेवाद्य ललितचन्द्रिका न किमपि चलति। (प्रकाशम्) अहो! इयं धीराया, यदुन्मत्ता अप्यान्तिके तिष्ठति। (स्वगतम्) "हळा उन्मत्ते चकोरिके! भाववचनं निशम्य कि-मेवं हससि। भावोऽस्तीति तिष्ठामीति ललितचन्द्रिका। हळा मुग्धे ललितचन्द्रिके! भावदर्शनेच्छयैवात्र त्वात्स्थितिर्न तु गुरुजनभक्त्येति प्रागेवास्माभिरवगतं" (इति चकोरिका च परस्परं सं-स्कृतमाश्रित्य सल्लपतः)। इदानीमियं ललितचन्द्रिका सखीसहास-जल्पितैरतिलज्जिता जाता।

क्वचित्सभ्रूभङ्गं क्वचिदमलघर्माम्बुरुचिरं
क्वचिल्लज्जानम्रं तरळतरनेत्रं क्वचिदपि।
स्मितार्द्रं क्वाप्येवं नवनवविकारं मृगदृशां
मुखं द्रष्टुं ब्रह्मापि च तदिह जीवत्वमयते ॥ ३३ ॥

चकोरिके! किं वदसि?

"इयं चकोरिकाप्राणदात्री ललितचन्द्रिका।
शुक्लपक्षमिवासाद्य त्वां वृद्धिमधिगच्छतु" ॥ ३४ ॥

इति—

चाटुशरस्फुरदमृत-
प्रयोगतस्त्वत्सखीलतामधुना।
कृत्वोन्मुखीमथाधर-
पल्लवमुल्लास्य किमपि हृष्यामि ॥ ३५ ॥

चकोरिके! किं वदसि? "स्तन्यार्थिनी रोदितीव मे पुत्री। तदहं गच्छामी"ति। (स्वगतम्) गतैव मावज्ञा चकोरिका। लज्जितचन्द्रिका हन्त! गन्तुमुत्सुका। तदेवं करोमि। (समीपमुपगम्य हस्तेन हस्तं गृहीत्वा) (प्रकाशम्)

लज्जां विधूय मुखमुन्नय सुन्दरं ते
बिंबाधरं मधुरमद्य पिपासुरस्मि।
लब्धं पुनस्त्वरितमेव निषेवणीयं
वस्तु प्रियं, विदुषि! दैवगतिर्हि वक्रा॥ ३६॥

(आकाशे) "वत्से! एह्येहि। स्नातुमहं गच्छामी"ति। अथेयं जननीशब्दमाकर्ण्य ससंभ्रमं हस्तं विधूय सहेलमिव केशानवकिरन्ती हन्त गच्छति। (मुहूर्तं तूष्णीं स्थित्वा सशोकम्)

चिरतप्तममुं लोकं
शिशिरयितुं यावदमृतमयवृष्ट्या।
कादम्बिनी प्रवृत्ता
तावत्तामाजहार हा! वात्या॥ ३७॥

(पुनर्विधिं प्रति)

कामार्दिताय बत! चाटुशतानुकूलां
बालां जनाय सुभगां चिरमीप्सितां च।
दत्वा रहस्यथ विधे! तरसापहर्तुं-
र्दत्तापहारजमघं न कथं तव स्यात्॥ ३८॥

माध्वीविरहिते पयोधरे मधुकरस्येव मम कान्त्र स्थितिस्तया विरहिते । प्रकृतमेवानुसरामीति । (परिक्रम्य वामतो विलोक्य—) इदं हि रसमञ्जरीभवनम् । अत्रास्ति वा न वा सुभगदीपः । प्रविश्यैव तत्त्वमवगच्छामीति (प्रविश्य विलोक्य—) हा कष्टतरेयमवस्था रसमञ्जर्याः । तथा हि ।

दीर्घोष्णं निश्वसन्ती प्रचलदुरसिजन्यस्तहस्ताब्जयुग्मा
शुष्कोष्ठी कीर्णकेशी नयनजलझराक्लिन्नपर्यन्तभूमिः ।
शुष्यन्ती कामतप्ता तप इव तटिनी सूर्यतप्तानुवेलं
हा हन्तोत्तानशायिन्यधिसुमशयनं वर्तते सुन्दरीयम् ॥ ३९ ॥

(उपसृत्य—) हा कष्टमिदानीं तु—

नोच्चलति शिरो नांघ्रि-
र्नेतरदङ्गं च किञ्चन तथापि ।
उत्थानोद्यममस्याः
क्षुद्रः श्वासो व्यनक्ति सस्वेदः ॥ ४० ॥

(ससंभ्रमम्) अयि प्रशिथिलदुर्बलाङ्गि! विरम विरमास्मादुत्थानोत्साहसाहसात् । इयमस्या वैरिणामपि दुर्दर्शा दशा । (परितो विलोक्य—) समागच्छन्तीमिमां माळवतीं पृच्छामि । अये इयं मामवलोक्य त्वरिततरमागच्छति । किं वदसि? "अस्मद्भाग्यैरेवात्रानीतो भावः । रक्ष रक्षेमां प्रियसखीमस्मान्महानर्थादिति" । किमनर्थबीजं ब्रूहि साकल्येन । किं वदसि? "शृणोतु भावः । कदाचिन्निशामुख एव सकलकविकुलमौ-

लिरमे वसन्तमिव प्रतिवेशिनीभवनागतमाकर्ण्य तत्काव्यश्रवणकौतूहलादियमस्मदाद्याभिः सखीभिः सह तत्र गतवती ।

तदानीं च—

तावत्तस्मिन् पुरुषतिलके दीपपार्श्वोपविष्टे
दीर्घाक्षीणां युगपदपतन् दृष्टिमालाः प्रफुल्लाः ।
यावद्याभिस्तिमिरलहरीसन्निभाभिर्हृताक्षः
किं न्वेतत्स्यादिति स परितोऽपश्यदुद्यात्स्मितं ताः।" ॥४१॥

इति । ततस्ततः । किं वदसि? ततश्च—

सुललितपदन्यासां दोषव्रजेन विवर्जितां
गुणगणयुतां सालङ्कारध्वनिं रसवर्षिणीम् ।
निजकृतिनटीं लोकाह्लादप्रदां समनर्तयत्
सकलविबुधोत्तंसो धीमान् स सत्कविपुङ्गवः ॥ ४२ ॥

तदानीं—

श्लाघाकम्पितशिरसां
तरुणीनां तरलकुण्डलद्युतिभिः ।
अन्तर्गृहं तदासी-
दुद्दामतटिच्छटाभिरिव पूर्णम् ॥ ४३ ॥

अपि च—

सर्वा विस्मृत्य पतीन्
सङ्केतस्थांश्च हन्त निशि जारान् ।

तत्कृतिरसहृतचित्ता-
स्तन्व्यश्चित्रार्पिता इव तदासन्" ॥ ४४ ॥

इति । ततस्ततः? । किं वदसि ?

"तदास्याः सव्याजप्रचलितकरालोलवलय-
ध्वनिं श्रुत्वोन्नम्य स्वमुखशशिबिम्बं स रसिकः ।
मुहुः पश्यन्नेनां कुवलयदलालोलनयनां
स्खलद्वागारम्भः समजनि च चिन्ताजड इव ॥ ४५ ॥

तदैव श्लोकोच्चारणसमयसमुत्थितेन किल तन्मुखवायुना निर्वाणे प्रदीपे नाटितकपटनिद्रागमेन तेन समापिता स्वकाव्यालापलीला । तदानीमेवास्माभिरश्रावि कुक्कुटकूजितं च । ततः ससंभ्रमं स्वं स्वं निकेतनं प्रति प्रस्थिताः सर्वा अपि वाराङ्गनाः । तत्र तावदस्मासु बहिर्निर्गत्य हस्तधृतवर्तिकाधिष्ठितदीपशिखानिवारितपर्यन्तान्धकारे मार्गे प्रियसखीमेनामनालोक्य संभ्रान्तचित्तासु त्वरिततरमियमन्तर्गृहान्निर्गत्य सरोषमिवोक्तवती—

"बहिर्द्वारालाभात्तमसि मम तस्मिंस्तत इतो
भ्रमन्त्याः क्वापीदं रदनवसनं घट्टितमभूत् ।
मया किं युष्माकं विरचितमिहागो वदत, त-
द्यतोऽहं त्यक्तैका तिमिरभरिते तत्र भवने" ॥ ४६ ॥

इति । तदास्मदाद्याः सख्यः—

तत्र कोमलमृणालगात्रि! ते
कण्टके किमधरो विघट्टितः ।
कण्टकावलिरियं तवाङ्गके
फुल्लपद्ममुखि! दृश्यतेऽखिले ॥ ४७ ॥

इत्युच्चैर्हसितवत्यः” इति । कपटमुद्रापाटनपटुरयं सखीजनपरिहासः । ततस्ततः? । किं वदसि? “तदनन्तरमियं किंचिल्लज्जिता मन्दं मन्दमत्रागत्य तमेवानुध्यायन्ती क्रमेणेमां दशां संप्राप्ता” इति । को वानयोः संगमविघ्नः? । किं वदसि? । “अस्याः सहोदरो वञ्चनशीलापतिरुग्रगन्ध” इति । (स्वगतम्) अहो दुष्टता वञ्चनशीलायाः । या निष्करुणा निरपराधमपि बन्धुजनं व्यथयति । वक्रशस्त्रशलाकां वक्रयन्त्रेणेव वञ्चनशीलां वञ्चनेनैव वशीकृत्य तयैव कार्यमिदं घटयामि । (प्रकाशम्) (रसमञ्जरीं प्रति)

विघ्नान् विनाश्य गणनाथ इवाद्रिकन्या-
भक्तः प्रियेण भवतीं घटयामि तेन ।
भीमं शपं बक इवात्र समुद्यतं मां
दृष्ट्वा निमीलयति दुष्टविधिः स्वदृष्टिम् ॥ ४८ ॥

मालावति! किं वदसि? “अथ आवसामभिरियं किंचिदाश्वस्ता । यदस्या मुखमहर्मुखारविन्दसुन्दरं जात”मिति । शीघ्रमेव गच्छामि कार्यं साधयितुम् । (इति परिक्रम्य पुरतो विलोक्य)

हसन् नृत्यन् क्रोशन् मुहुरनियतं धूसरकचः
कृशो लोलैर्बालैर्हसितविवृतास्यैः परिवृतः ।
विरूक्षाक्षः कक्षस्थितविपुलभाण्डोऽतिमलिनं
वसानः कौपीनं भ्रमति परुषः कोऽपि पुरुषः ॥ ४९ ॥

एतत्सल्लापादिकं परिहर्तुमिमां वटविटपिच्छायामाश्रित्य क्षणं तिष्ठामि । (तथा कृत्वा) अये अयं 'उन्मत्तोन्मत्त महोन्मत्त! भवत्तातस्य भवतो वा वयोऽधिकम्? श्रुतमस्माभिरतीते मासि कश्चिन्मृत इति । स किं भवानेव? किं तवास्मिन् कक्षस्थिते भाण्डे? किमु मातृश्मश्रुपिण्डम्? । उत हस्तिन्यण्डकोशः? अथवा स्तनभारः कुम्भकर्णस्य? किमु वेगवसं रयेण जेतुमेवं धावसि? अथवाकाशपतनभयेन? उत सदागतिग्रहणाये'त्यादिपरिहासवचनवाचालिताशेर्बालैरनुगम्यमानस्त्वरितमित एवागच्छति । (निपुणं निरूप्य) हा कष्टमेष भद्रसेनमहाराजप्रेमास्पदं सखा मे कल्याणकण्ठः कथमीदृशीं दशामापन्नः? ।

(सशोकम्)

स्थिरत्वौन्नत्याभ्यामधिकमिति देवा हरिमुखाः
श्रयन्ते यन्नित्यं कनकगिरिमुल्लङ्घ्य सरसम् ।
तदस्येदं चित्तं कथमिव परिभ्रान्तमभव-
द्दुरूहं संसारे दुरितसुकृतानां फलमहो ॥ ५० ॥

अथ परितः प्रवृत्तकलकलानेतान् परिहासशीलान् बालान्

विद्रावयामि । (उच्चैः सरोषमिव) रे रे! बालका युष्माकममुष्मिन्नपि स्वाध्याये विशृङ्खलं खेलतामिदं दुश्चेष्टितमाकर्ण्य खण्डितप्रचण्डकोपो दण्डपाणिराचार्य इतः समापतति (स्वगतम्) हन्त! भयेनाद्य मूढैर्झटित्यपयातं बालकैः। (कल्याणकण्ठहस्तं हस्तेनावलम्ब्य प्रकाशम्) सखे! किमेवं सन्तापयन्मातापितरौ, उल्लङ्घयन् गुरुशासनमचिन्तयन्महाराजं, अगणयन् बन्धुजनं परिभ्रमसि? किं वदसि?

"कालस्यैव वशंवदा प्रियतमा, वस्त्येव तस्याः कचं,
वक्त्रं, फालतलं, कपोलफलकं, दन्तांश्च, दन्तच्छदम् ।
अङ्गाभामपि हाटकद्रवमयीं लोकत्रयव्यापिनीं
स्वच्छन्दं प्रकटय्य हा! विरचते तापानुवृत्त्यै मम" ॥ ५१ ॥

इति । (स्वगतम्) हन्त नूनमयं मदनोन्मादी । यद्य ध्वान्तेन्दुतारसन्ध्यातरणिकिरणादिषु कान्ताकुन्तलादिभ्रमेणैवं प्रलपति । (प्रकाशम्) किमस्मिन् काष्ठस्थिते भाण्डे? किं वदसि? "तस्याः कुचभर" इति? तर्हि दर्शयेदानीं । किं वदसि? "परम"मिति (विलोक्य स्वगतम्) अहो महानयं पाषाणखण्डः । हा कष्टम् । बन्धनशीलां बन्धयितुं मया प्रेषितोऽयं तया वञ्चितः । तस्मादेवंविधो जात इति तर्कयामि । राजकार्यगौरवेणाद्य द्रष्टव्यः सुभगर्दपः । उन्मत्तश्चायं प्रियसुहृद्वर्तते । किं मया करणीयम्? (तिर्यग्विलोक्य)

क्षितितटखुरपुटघट्टन-
चटपटशब्दापसारिताध्वजनम् ।

तुङ्गं तुरङ्गपुङ्गव-
माधिष्ठित: कोऽपि शीघ्रमापतति ॥ ५२ ॥

अये बालकोकिलोऽयं तुरगादवतीर्य समुपागत एव । (प्रकाशम्) सखे बालकोकिल! पश्य पश्य पशुमृगादिवत् स्वच्छन्दचारिणं ते सब्रह्मचारिणम् । (सास्रं पश्यन् सगद्गदम्) किं वदसि?

"गरस्य पानादथवाभिचारा-
न्निष्कासनाद्वा नरनाथपुर्या: ।
ग्रहग्रहाद्वा मदनग्रहाद्वा
सखायमुन्मत्तधुरन्धरोऽभून्" ॥ ५३ ॥

इति । नाहं जानामि । तथाप्येवं तर्कयामि । मङ्गलमालानुरक्तस्तदलाभादेवं प्रमत्तो जात इति । यदस्य प्रियाप्रशंसाप्राया: प्रलापा: । किं वदसि?

"दाक्षिण्यतारुण्यगुणान्वितस्य
सा दुर्लभा स्यात् कथमस्य धीमन्! ।
विद्यार्थिनां धीभिरिवागमार्थः
संचिन्त्यते य: खलु सुन्दरीभि:" ॥ ५४ ॥

इति । वञ्चनशीलादौश्शील्यमेवात्र हेतुं तर्कयामि । (विचिन्त्य) सखे! अहं त्वरावान् । तद् भवानेव कान्तावानवचनादिभिरमुं सान्त्वयित्वा मध्याह्नकाले समागच्छतु सा-

कमनेन संगीतप्रसङ्गाय लीलालक्ष्मीमन्दिरम् । किं वदसि? "कस्तावद् भवतस्त्वराहेतुरिति" । शृणु विस्तरेण । अतिक्रान्ते वत्सरे कस्याश्चित् कठोरकलानिधिकरनिकरविच्छुरिततयामृतवर्षिण्यामिव रजन्यां भद्रसेनमहाराजसंभोगसौख्यमनुभूयानन्दवल्ली पुनस्तद्विरहिता नातिदीर्घेण कालेन—

स्नानालंकारपानाशनविहृतिकलाभ्यासनिद्रादिशून्या
विद्येवाचार्यशापादधिकशिथिलिता विप्रयोगात् प्रियस्य ।
कामाग्निग्रस्यमाना सकलगुणयुता बन्धुचक्रस्य चक्रे
संतापं संभ्रमं च ज्वलनपरिवृता राजधानीव राज्ञः ॥ ५५ ॥

तदानीं तज्जनकः परार्द्ध्यप्रभुस्तैस्तैर्लक्षणैरनङ्गमेवास्यास्तापहेतुं निश्चित्य सलज्जाया हृद्गतं पुरुषं चाज्ञात्वा स्वयंवरविधिनैव तत्संतापं नाशयितुमारब्धवान् । ततश्च दूतैरानीयमानेषु गुणवतां नृपमन्त्रिविटादीनां चित्रन्यस्तेषु रूपेषु आनन्दवल्या परित्यक्तो वसुमित्रस्तु शोकरोषाकुलात्मा वञ्चनशीलादुष्टोपदेशात् पाण्ड्यनाथं चण्डसेनं बहुभिर्धनैः प्रीणयित्वानन्दवल्लीस्वयंवरविघातमेकमेव याचितवान् । स च स्वीकृततद्याच्ञः समागतश्चण्डसेनश्चण्डसेनः । किं वदसि? "महानयं त्वरावकाशो भावस्य । तत्त्वरितमेव गच्छतु भवान् । अहं भवदाज्ञां पालयितास्मि" इति । (तथैवेति परिक्रम्य दक्षिणतो विलोक्य) इदं हि नवमालिकानिलयनम् । तदन्तः प्रविशामि सुभगदीपं विचेतुमिति (प्रविश्य परितो विलोक्य) ना-

न कश्चिच्चेटीजनादन्यो जनः । नवमालिका स्नातुं वदेदिति तर्कयामि । सविधो गच्छामि । (इति कतिचित्पदानि गत्वा) (आकाशे)

"जयतीह यन्मधु सुधारसोपमं
नवमालिकामपि विमुच्य तामहो ।
अभिषेककालमपि सोढुमक्षमो
मधुप! क यासि परिगृह्य चापलम्" ॥ ५६ ॥

इति । (शब्दानुसारेण विलोक्य सस्मितम्)

माणिक्यचञ्चुचरणं
मरतकपक्षं प्रवालकाक्षम् ।
सुन्दरचन्दनशिखरे
सुखमास्ते किञ्चिदत्र शुकरत्नम् ॥ ५७ ॥

अद्य वाचाटममुमेवं वदामि । अये शकुनतिलक! तारुण्यलावण्यादिगुणपरिपूर्णमिदमात्मवपुः शारिकावियोगेन शिञ्जिनीविरहेण धनुरिव विफलीकुर्वन्तं भवन्तमनुचितव्यापारेयं निश्चिनोमि । किं वदसि?

"द्विजस्य मे सा खलु धर्मपत्नी
पतिव्रतानां प्रवरा विटेन्द्र! ।
स्त्रैणप्रियं त्वामवलोक्य भीता
कुत्रापि लीना मम कोऽत्र दोषः" ॥ ५८ ॥

इति । (स्वगतम्) शकुनवचनमिदं निशम्य हसन्त्येता हस्तावास्फोट्य चेकुः । (प्रकाशम्) अये कळालाप! शुकतिलक! परितुष्टोऽस्मि ते विस्मयदायिना वचनेन । एह्येहि मान्तिकम् । आगतः किं वदसि? "कळावासं मां किं कळालापं निर्दिशसी"ति । किमु भवान् कळावासः? किं वदसि? "अथ किमिति" । अलमनेन वाग्वादेन । भवच्चरितज्ञानकौतुकि मे चित्तम् । तत् कथय कुत्र ते जन्म? केन वा वर्द्धितोऽसि? कस्यासि? कुत उत्पन्नस्ते पक्षिगणासाधारणोऽयं बुद्धिविशेषः? का विद्या भवताभ्यस्ताः? को गुरुर्भवतः? किमर्थं चात्रागमनम्? किं वदसि "शृणु सर्वं संक्षेपतः कथयामि । श्रीकुरुम्बवने देवीपुरस्थितजीर्णाश्वत्थवृक्षदक्षिणशाखाकोटरे मम जन्म । वर्धितोऽहं नवप्रासादवासिनीभिः कोटिलिङ्गक्षितीश्वरीभिस्तासामेवास्मि, दिष्ट्या लब्धस्य समास्वादितस्य देव्युच्छिष्टत्रिमधुरस्य प्रभावादिदं दिव्यज्ञानं मे जातम् । श्रुतिस्मृतिपुराणेतिहासशास्त्रसंघवैद्यज्योतिषमन्त्रतन्त्रदण्डनीतिनाटकालङ्कारकवनव्याख्यानसर्वभाषाचित्रलेखनसंगीतेन्द्रजालाद्याः सकलकलाश्च मयाभ्यस्ताः । कुंभकोणजातः सकलगुणसिन्धुः करुणाकरस्तत्रभवान् सर्वज्ञचूडामणिः श्रीकृष्णविप्रेन्द्रो ममाचार्यः । आनन्दवल्लीस्वयंवरदर्शनार्थमत्रागतोऽस्मि" इति । साधु सखे! सतीर्थ्य! साधु । त्वत्साहाय्येन साधनीयं मे किञ्चित् कार्यमस्ति । किं वदसि? "किं तदिति" । अस्ति खल्वत्र नगरे बन्धनशीला नाम

काचिद्वारनारी । किं वदसि? "मया सा ज्ञातपूर्वा । या किलोग्रगन्धप्रियतमेति" । अहो नास्त्यविदितं वस्तु लोके भवतः । तस्या वञ्चनमेव । 'किं वदसि? "अत्र किं मया विधातव्य"मिति । यथा सा मदनुरक्ता मत्सुरतार्थिनी मध्याह्नतः प्रागेव लीलालक्ष्मीमन्दिरे सान्द्रान्धकारं भूवेश्म प्रविशेत्,तथा विधातव्यम्। किं वदसि? "ओ"मिति। सा हि महामतिः कपटशास्त्रतत्त्वज्ञा कल्याणकण्ठस्याप्युन्माददायिनी । तत्त्वया तत्र समाहितेन मनसा वर्तितव्यम् । किं वदसि?

"शिवाप्रसादादपि विष्णुमायां
तां वञ्चयिष्येऽखिलमोहदात्रीम् ।
तस्यास्य मेऽत्यल्पमिदं मनुष्य-
स्त्रीवञ्चनं मा तव भूद्विशङ्का ॥ ५९ ॥

तदद्यैव गच्छामी"ति । गत एवायमाकाशमाविश्य मनोवेगः शुकमणिः । (इति परिक्रामन् पुरतो विलोक्य) आगच्छतीयं नवमालिका ।

अहमिह निगृहीतः शत्रुणेत्यश्रुपूरं
निपतदमितमाध्वीकैतवादुद्वमन्तम् ।
तरुणमरुणपद्मं मन्दमालोलयन्ती
करकिसलयसंस्थं, कामिनीयं विभाति ॥ ६० ॥

इयमुपागतैव। (प्रकाशम्)

कल्याणि! पल्लवगणैरुपसेव्यमाना
कन्दर्पदर्पजननी सुमनःसमेता।
उद्भासिता भ्रमरकैर्नवमालिका त्व-
मामोदभारमधिकं कुरुषेऽधुना मे ॥ ६१ ॥

किं वदसि? "भो विटेन्द्र! भवत्कण्ठे प्रियान्यस्तेयमशोकमालिकैवामोदहेतुः । नेयं दूरस्था नवमालिका" इति (स्वगतम्) नूनमियं मत्कण्ठगतां मण्डलकावलीं विलोक्यैवं वदसि । (प्रकाशम्) अयि मञ्जुभाषिणि! अद्याहं त्वरावान् । तद् द्रुतं गच्छामि । किं वदसि? "सर्वदेत्येव वक्तव्यं, नाद्येति । तथा हि सन्तः समामनन्ति ।

वायोर्विटानां भृङ्गाणां
विद्युतां योगिनामपि ।
कुत्रापि न स्थितिर्लोके
क्षणार्धमपि विद्यते" ॥ ६२ ॥

इति । अयि प्रिये! अलमलमनेनोपालम्भेन ।

शिरः सिन्दूराभैश्चरणनलिनालक्तकजलै-
रुरश्चन्द्रच्छायैः स्तनविनिहितैश्चन्दनरसैः ।
क्षतैश्चालंकर्तुं गलमरुणशोभैर्नखकृतै-
र्जवेनागन्तास्मि त्वदुदवसिते मुग्धहसिते! ॥ ६३ ॥

(इति परिक्रम्य पुरतो विलोक्य) अये अत्रैव महाराजनर्मसुहृद्भाण्डोदरो वर्त्तते । अथेदानीं तु—

ह्रस्वोऽतिह्रस्वभग्नासमकरचरणो दीर्घलोमावृताङ्गः
कुम्भाभाजानुलम्बाधिकचलदुदरो जीर्णधूमाभवस्त्रः ।
खाबाटः स्वेदमग्नो हरितरदततिर्हासयन् हर्म्यसंस्था
रुद्धश्वासं नताङ्गीरतिविकटगतिः शीघ्रमायात्यमायः ॥६४॥

सखे भाण्डोदर! अस्ति किं तवेच्छा बन्धनशीलासुरतोत्सवे । किं वदसि? "नास्ती"ति । कोऽत्र हेतुः? किं वदसि? "असाध्यबुद्धिरेव । शृणु चेमां कथाम् । पुरा कदाचित्—

दुग्धासितां मधुसितेक्षुरसाधरोष्ठीं
तां पीनपिष्टककुचां कदलीफलोरुम् ।
धीमन्! नवीननवनीततनुं सुवृत्त-
वक्त्रां विलोक्य मम तत्र दृढा स्पृहाभूत्" ॥६५॥

इति । (सहासम्) ततस्ततः? किं वदसि? "ततः शुभस्य शीघ्रमिति न्यायेन तत्क्षण एव तां मदभिलाषं निश्शेषमुक्तवान् । सा च तच्छ्रुत्वा सादरं सश्लाघं च, "भो तपोनिधे! ब्राह्मणोत्तम! श्वो निशीथे भवता मद्गृहे समागन्तव्यम् । अहं तूद्घाटितकवाटा शय्यायां वर्तिष्ये" । इत्युक्तवती" । इति । अहो कौटिल्यं बन्धनशीलायाः । ततस्ततः? किं वदसि?

"पशुबुद्धिरहमेतत्सर्वं सत्यमित्येव निश्चित्य सन्तुष्टो बहिरङ्गाद-न्तरङ्गमेव प्रधानमिति जितामृतैः परमान्नैस्तदेव मण्डयित्वा निबिडान्धकारे निशीथे तस्या वासगेहं प्राप्य शनैश्शनैः स्पृष्टवांस्तद्वक्षोजं" इति । ततस्ततः? किं वदसि?

"स्पृष्टे मया तु निधिकुम्भ इवादसीये
वक्षोरुहे तमसि हस्ततलाञ्चलेन ।
तत्र स्थितेन बत तत्पतिनातिरोषात्
क्ष्वेळोल्बणेन फणिनेव निपीडितोऽहम् ॥ ६६ ॥

स तदानीं तु भयाद् द्रुतं गन्तुमुद्यतस्य मम लम्बमानमुदरं निगृह्य हस्ताभ्यां निष्ठुरं निष्पिष्टवान् । तथा तेन जठरे निष्पीड्यमाने प्राणेभ्योऽपि प्रियतरं परमान्नमनवशिष्टबिन्दुमात्रं मयोद्भूतभीमनिर्घोषमुद्वान्तं" इति ।

हा कष्टमेतत् । ततस्ततः? किं वदसि? "ततश्चातिपूतिगन्धिना तेनोद्वान्तेन जळूकाजलपिच्छिललालाविलेनान्नेन सर्वाङ्गमभिषिक्तः स सपदि मां मुक्तवान्" । इति ।

(सश्लाघम्)

दैवमिव वन्द्यते य-
स्त्वयानिशं पायसं ततस्तेन ।

तुष्टेन रक्षितस्त्वं
जठरादभ्युद्गतेन मरणभयात् ॥ ६७ ॥

ततस्ततः? किं वदसि? "ततः ससंभ्रममितस्ततः पतनघट्टनाभिर्जर्झरीकृताङ्गोऽहं प्राप्तवान् भवनं महता वेगेन" इति । सखे! भाण्डोदर! मा भैषीः । वञ्चनशीलासुरतलाभायास्ति कश्चिदुपायः । किं वदसि? "तर्हि वदे"ति । अस्मिन् दिने मध्याह्नतः पूर्वं वञ्चनशीला मत्सुरतार्थिनी लीलालक्ष्मीमन्दिरे भूवेश्म प्रविशेत् । ततः प्रागेव सकलपुरुषस्वभावानुकरणचतुरेण त्वया तत्र स्थातव्यम् । (सानन्दम्) किं वदसि? "सखे! शृङ्गारसार! देह्यनु भवदुत्तरीयम् । येनावृताङ्गं मां स्पर्शादपि सा भवन्तमेव जानीयात्" इति । सखे! गृहाण मदङ्गममुं दण्डं चेति (नाट्येनोत्तरीयं दण्डं च दत्वा स्वगतम्) सोत्साहमयं गत एव भाण्डोदरः । (परिक्रम्य वामतो विलोक्य) इदं मणिमालिकामन्दिरम् । सुभगदीपमन्वेष्टुमत्र प्रविशामि । (प्रविश्योर्ध्वमवलोक्य) अथ हि—

तिमिरनिकरनीलं शोणशोभैर्नखाग्रै-
श्चिकुरमवकिरन्ती सौधपृष्ठे चरन्ती ।
इयमसमयसन्ध्याभ्रान्तिमन्तर्जनानां
विलसति जनयन्ती मन्मथं जीवयन्ती ॥ ६८ ॥

(प्रविश्य परितो विलोक्य) नास्त्येवात्र सुभगदीपः । तथा-

प्यथैवातो गमनं दाक्षिण्यविरोधि । तत् कार्यभाराकुलेऽपि किञ्चिदनया सल्लपामि । (उपसृत्य)

मृत्योरप्यधिकव्यथामगणयन् दुष्कीर्तिमन्त्रात्मनः
कौटिल्यं सहसावलम्ब्य हृदयं चाकृष्य यः प्राणिनाम् ।
स्निग्धस्त्वद्वशगान् करोति तमधः कस्मान्निपात्याधुना
कष्टं पृष्ठतले करोषि चिकुरं मूर्ध्न्येव मुग्धे! कुरु ॥ ६९ ॥

किं वदसि? "जलार्द्र इति मूर्द्धजं न मूर्ध्नि निबध्नामि" इति ।

केशेषु मत्सरवतो हरिनीलनीलान्
धूपान् प्रसज्य नवागरुचन्दनोत्थान् ।
आर्द्रत्वनाशविधये विधुवल्लभाभे!
को वार्द्रतां भजति मत्सरिणि प्रसक्ते ॥ ७० ॥

किं वदसि? "तथैवे"ति । (स्वगतम्) इदानीमस्या दृगञ्चलचलनमात्रेण चेट्यः ससंभ्रममागत्य गन्धद्रव्यैः कुन्तलं धूपयन्ति । इयं च सद्यो धूपोष्मत्याजितार्द्रभावं केशं बन्धुरं बन्धुमुपक्रमते । (प्रकाशम्)

धीराणां मानुषाणां भवविपिनतले हेमरज्जूपमाभ्यां
याभ्यां बध्नासि चेतः क्षितिधरसदृशं त्वं भुजाभ्याममूभ्याम् ।

रोम्णां लेखातनूनां नियतमनुचितं बन्धनं बन्धुराभे!
हन्तुर्दन्तीश्वराणां हननमिव हरेः क्षुल्लकानां वृकाणाम् ॥ ७१ ॥

(तद्वेणिकाबन्धनं नाट्येन विधाय — तिर्यग्विलोक्य) अये चेटीभिः समानीतैवेयं नवमालिकासुममालिका ।

मुग्धे! मधुव्रतगणान्मलिनात्स्वकीय-
सारापहारनिरतान्नितरां भयेन ।
आसेवितुं स्पृहयते जितभृङ्गजालं
त्वत्केशपाशमधुना कुसुमावलीयम् ॥ ७२ ॥

(नाट्येन मालामादाय तत्कबरीमलकृत्य सश्लाघम्)

अत्यादराद्दरदलत्कुसुमावलीषु
लोके पतन्ति मधुपा मधुपानलुब्धाः ।
आसज्जति त्वदतिमोहनकेशभृङ्ग-
जाले तु चित्रमधुना सुममालिकेयम् ॥ ७३ ॥

किं वदसि?

"हसति मम वेणिका तव
हस्ताम्बुजसङ्गसंगतामोदान् ।
तस्य धवळप्रभाते
तनोति जातीसुमावलीशङ्काम् ॥ ७४ ॥

इति । अयि प्रियमधुरालापिनि! कार्यवशादिदानी-मेव गच्छामि । (इति परिक्रम्य पुरतो विलोक्य) अये बहुभिर्जनैरावृतः कश्चिदित एवागच्छति । को भवान्? का च तवैतज्जनसङ्घाकर्षिणी विद्या? किं वदसि?

"भो महाराजसेवकेन्द्र! नाम्नाहं लघुहस्तः जात्या शूद्रश्च । निष्णातोऽस्म्यसाधारणायामिन्द्रजालविद्यायाम् । अस्ति मम महाराजपुरोभागे विद्यां प्रकटयितुं मनोरथः । स तु करुणावता भवतैव पूरणीय" इति । किं नु भवान् समर्थो धीराणामपि मनः क्षोभयितुमिन्द्रजालेन? "किं किं बहुभिरुक्तैः? अहमेवातिधीरं तं कल्याणकण्ठं मङ्गलमालामरणमिन्द्रजालेन दर्शयित्वोन्मत्तं कृतवान्" इति । (सरोषम्)

रे! रे! मत्सखं महाराजप्रियतमं तं कस्मात्त्वमेवं कृतवान? सत्यमेव भण । नो चेदयमेव कालस्तव शूलारोहणस्य । (सभयकम्पम्) किं वदसि? "वञ्चनशीलाकृतान् सुवर्णसहस्रदानयाचनाश्च क्षन्तव्योऽयमजानतो ममापराधः । तमद्यैव स्थिरचित्तं रचयामि" इति । लघुहस्त! तथास्तु । दर्शयाद्यातिहृद्यां ते विद्याम् । किं वदसि? "परम"मिति ।

(क्षणमिव स्थित्वा)

अहो चित्रं चित्रं मृगमदरसामोदितसुधा-
महावर्षो हर्षप्रद इह पतत्यम्बरतलात् ।

(ऊर्ध्वमवलोक्य—)

सुधावर्षो नायं विदितमपि तत्त्वं सुरतरु-
प्रसूनालीनिर्यन्मधुरमधुवर्षो विजयते ।। ७५ ।।

(परितो विलोक्य) विचित्रतरुफलकुसुमारुणपल्लवादिभिरतिरमणीयं नन्दनादप्यानन्ददं चैत्ररथादपि विचित्रमिदमुद्यानं कथमिहोद्भूतम्? (पुरतो विलोक्य)

चित्रं चित्रं विचित्रं किमिदमिह जवादापतन्त्यन्धकार-
घोघत्सूर्येन्दुभासो दिनपतितनयाशोणगङ्गाप्रवाहाः ।
(परितो विलोक्य) हन्त! भयेनापसृता एव सर्वे ।
(ससंभ्रम किञ्चिदपसृत्य सविषादम्)
हाहाहं किं करोमि प्रबलजलपरीवाहमग्नोऽस्मि
(निपुणं निरूप्य सविस्मयम्) तत्त्वं,
ज्ञातं कस्याश्चिदेते दृगधरहसितोल्लासिशोभाविलासाः ।। ७६ ।।

(विचिन्त्य) अहो नूनमियं देवी विष्णुमाया । तथा हि । व्यासादिनिर्दिष्टानि सल्लक्षणान्यस्यां लक्ष्यन्ते । चित्रमत्र भूमा लावण्यादिकानां गुणानामदृष्टपूर्वोऽश्रुतपूर्वोऽचिन्तितपूर्वश्चास्माभिः तथा हि ।

अस्याः सौन्दर्यपूर्णा परिमळरभसाकृष्टलोलम्बमालां
मुग्धाक्ष्या मूर्तिवल्लीं किसलयमृदुलामद्भुतां दर्पणाच्छाम् ।

आश्लिष्यन्त्यत्र नूनं प्रतिफलनमिषात्तीव्ररागाभिभूता-
श्चित्रं निश्शेषलोकास्त्रिभुवननिलयाः पक्षिवृक्षादयोऽपि ॥ ७७ ॥

हन्त! त्रिजगद्वन्द्यामिमां देवीं विलोक्य मोहान्मम चेतः कामहतं भवति । (पुनस्तां प्रति) अयि देवि! हरिमाये!

मोहैकबीजमपि ते
मोहोच्छित्त्यै भजामि रूपमिदम् ।
पङ्कादपि जलमेव हि
पङ्कप्रक्षाळनायालम् ॥ ७८ ॥

(कळकळश्रवणं नाटयन् तदनुसारेण विलोक्य । सविस्मयभक्तिरसम्)

उन्मीलत्कण्ठघण्टाघणघणघननिर्घोषपूर्णाखिलाशं
तुङ्गं कैलासशृङ्गभ्रमकरककुदं पुंगवं तीक्ष्णशृङ्गम् ।
आरूढः प्रौढकान्ताकठिनकुचदृढाश्लेषतोषाकुलात्मा
भाति त्र्यक्षः समक्षं सगण इह नमत्स्वर्पतिर्दर्पकारिः ॥ ७९ ॥

(शिवं प्रति)

सदापि ब्रह्मेन्द्रप्रभृतिसुरमाणिक्यमकुटै-
र्नितान्तं नीरन्ध्रे तव चरणपाथोजसंविधे ।

अभापि त्वत्सेवानिरतमनसोऽल्पस्य नितरां
कृपासिन्धो! नन्तुं कलय सकृदप्यन्तरमिह ॥ ८० ॥

(पुनः गौरीं प्रति सप्रणामम्) अयि देवि! दयाशालिनि! शैले-न्द्रकन्ये!

त्वद्भक्तिरेव मे स्यात्
त्वत्तोप्यधिका हि सा प्रभावेण ।
परमेश्वरेश्वरीं त्वां
पार्वति! यार्ल वशीकुरुते ॥ ८१ ॥

(विलोक्य) अये इयं देवी अतिसुन्दरमणिकन्दुकक्रीडां करोति । अद्य हि—

मन्दोच्चलन्मणिविभूषणमञ्जुनादं
ताटङ्कचक्रहतिताम्रकपोलमूलम् ।
ताराविलासविलसत्तरलायताक्षं
कान्तं वपुर्जयति कन्दुकलीलयाऽस्याः ॥ ८२ ॥

किं च—

संभ्रमशिथिलितकचपट-
संयमनोर्द्धयुक्तवामबाहुलतम् ।

हृदयभुजमूलनाभी-
देशं कुरुते वपुर्मुदं मेऽस्याः ॥ ८३ ॥

अपि च—

उन्मीलत्स्वेदबिन्दुप्रकरविकलितापप्लुतस्वच्छमुक्ता-
हारं निश्वासगन्धैः सुरभितभुवनं तान्तकान्तावलग्नम् ।
हस्ताग्रोन्मथ्यमानस्वरिपुपरिचलत्कन्दुकालोकनोद्य-
त्प्रीत्या नृत्यत्कुचं मे जनयति कुतुकं नेत्रयोर्गात्रमस्याः ॥ ८४ ॥

(पुनः सशिरःकम्पम्)

चरणविरणन्मञ्जीरायाः करप्लुतकन्दुक-
ग्रहणविधये चञ्चद्विह्वलितस्तनकन्दुकम् ।
मृदुलहसितैरस्या यान्त्याः ससंभ्रमविभ्रमं
हरति जघनाद्वायुर्वासस्तदाशु जनाशयम् ॥ ८५ ॥

(पुनः शिवं विलोक्य) अयमिदानीम्—

आलोकयन्नधिकसुन्दरमङ्गमस्या
नेत्रद्वयेन भगवाननवाप्ततृप्तिः ।
उन्मीलयत्यलिकजातमपि स्वनेत्र-
मानन्दजाश्रुशमितानलमिन्दुमौलिः ॥ ८६ ॥

अपि च—

लक्ष्मीं प्राप्तुं स्वविद्यामिव सपदि शिवामेष विस्मृत्य शम्भु-
र्धावत्येनां गृहीतुं सकलजनमनो द्रावयन्तीं द्रवन्तीम् ।

(पुनः सविस्मयम्)

किं न्वेतद्विष्णुमाया प्रविशति तरसा चन्द्रमौलिश्च पश्चात्
गौरी देवाश्च सर्वैरुपवनतरुभिर्मक्षिकाकुक्षिरन्ध्रम् ॥ ८७॥

कथमेते महान्तः सर्वेऽपि माक्षिकावक्त्रं प्रविष्टाः ! (विचिन्त्य) आः लघुहस्तविद्याप्रभावोऽयम् । हन्तेन्द्रजालजाया-मस्यां पुरातनमहापुरुषविद्यायां कथायां सत्यबुद्ध्यात्यन्तं परिभ्रान्तोऽस्मि । (प्रकाशम्) साधु सखे! लघुहस्त! साधु भवानेव लोके इन्द्रजालविद्यापारंगतः । किं वदसि? "सर्व गुरुकटाक्षा"दिति । शीघ्रं कल्याणकण्ठं स्थिरचित्तं कृत्वा भवतासन्ध्यमानन्दवल्लीस्वयंवरमण्डपे स्थातव्यम् । तत्र यदि शत्रुबाधा स्यात्तर्हि सा शमनीया चेन्द्रजालेन । श्व एव भवन्तं महाराजं दर्शयिष्यामि । किं वदसि? "तथास्त्वि"-ति । सुभगदीपदर्शनमिदानीं मन्दप्रयोजनं जातम् ।

(इति परिक्रम्य उष्णस्पर्शमभिनीय)

कृत्स्नं मत्स्यत्वमाप्य प्रळयजलनिधिक्षोभितां यामरक्षं
सम्यक्तुङ्गशृङ्गे विधृतकिटितनुः पूर्वमुद्धृत्य चाब्धेः ।

सेयं जाया धरित्री नृपशतवशगेतीक्षते तां दिधक्षन्
क्रोपादथान्तरीक्षाभिधमधुमथनश्चक्षुषा दक्षिणेन ॥ ८८ ॥

अपि च—

स्वेदच्छलान्मधु मृगायतलोचनाना-
मासञ्जयन् दिनकृदेष मुखाम्बुजेषु ।
उच्चाटयंश्च मधुपान् करतोम्बुजौघा-
दद्य प्रकाशयति पङ्कजबन्धुतां स्वाम् ॥ ८९ ॥

हन्त! विजृम्भतेऽयमधुना मध्याह्नकालः । अग्न्युद्गारिण्य इव वर्त्तन्ते दिशः । तल्लीलालक्ष्मीमन्दिरं प्रविशामि । अये वञ्चनशीलासहोदरेण साकमग्रत एवोग्रगन्धो वर्त्तते ।

गौरः शूराभिमानी धनुरिव नमनद्वेषतस्त्रिप्रयत्ना-
दृक्रीकृत्य स्वपृष्ठं जनहृदि जनयन् वातरोगित्वशङ्काम् ।
लीलोदस्तोत्तरीयस्थगितरविकरोऽत्यर्थमुत्तानितास्यः
स्वर्णालङ्कारदीप्तः स्वयमभिपततीहोग्रगन्धो मदान्धः ॥ ९० ॥

इदानीं त्वधोमार्गादर्शनान्मुहुः स्खलन्, पार्श्वानवलोकनव्रतेन पार्श्वस्थानपि जनानजानन्, धैर्यवीर्यवित्तविद्याभिजात्यसौभाग्यसौन्दर्यादिभिरात्मन्यध्यारोपितैर्गुणैर्मत्ताशयोऽग्रभत्या - सन्न एव जळप्रभुः । (साञ्जलिबन्धम्)

जगद्द्विकामं द्विहरिं द्विपद्मजं
द्विमाधवं चाकलयन् द्विशङ्करम् ।
अनन्तकल्याणगुणायनं भवा-
निहाश्रितं मां सकृदद्य पश्यतु ॥ ९१ ॥

(स्वगतम्) उत्तानमुख एवायमद्य पश्यति मां कथंचन मदचञ्चलेन दृगञ्चलेन । किं वदसि? "कथमत्र बालः शृङ्गारसारः । वद त्वं बन्धनशीलादिभिरप्यविदितमिदमस्मत्तत्त्वं कथमिव ज्ञातं त्वया?" इति । सर्वज्ञाय भवते किं निवेदनीयम् । किं वदसि? "किमिदमतीतायां निशि स्वप्ने गोत्रस्नेहाद्वासिष्ठेनोपदिष्टम्"? इति । सर्वसाक्षिन्! भगवंस्तथैव तथैव । किं वदसि? "वत्स! मद्भक्तोत्तंसोऽस्तु" इति ।

सकलपुरुषान्तर्यामिणा भवता ममेष्ट एव वरो दत्तः । (स्वगतम्) अद्य सन्तोषविकचवदनस्यास्य पृष्ठवक्रतादिकं द्विगुणितं जातम् । किं वदसि? "वत्स! कुत्र नेयेयमुष्मातपवेला" इति । सन्निहिते लीलालक्ष्मीमन्दिर एव इति । (तेन सह परिक्रम्य) अत्र कल्याणकण्ठबालकोकिलाभ्यामन्तः समारब्धमेव संगीतम् । अद्य हि—

अजानन्तो हन्त! द्युमणिकरसङ्गं कळगळ-
स्वराकृष्टा दृष्टा बहिरिह निविष्टा द्विजमृगाः ।

अचिरमन्यस्तत्वं निरवधिसुखस्तब्धवपुषा-
ममीषामुन्नेयं भवति च निमेषाभयनयोः ॥ ९२ ॥

(अन्तः प्रविश्य विलोक्य) निबिडितमेवेदमन्तर्गृहं गानश्रवणोत्सुकैः स्त्रीपुंसैः । अद्य तु मामवलोक्योत्तिष्ठन्ति समापितसङ्गीतप्रसङ्गाः कल्याणकण्ठबालकोकिललीलालक्ष्म्यः उग्रगन्धदर्शनजातहासाः सामाजिकाश्च । (सानन्दम्) दिष्ट्या! कल्याणकण्ठो नष्टोन्मादः सुवेषश्च जातः । लीलालक्ष्मीस्तु लीलयादितालं हस्ताम्बुजाभ्यां कलयन्तीतः समागच्छति ।

(उग्रगन्धं प्रति)

इयं लीलालक्ष्मी स्तनघटतटस्पन्दललितं
समुत्थायायान्तं सकरुण! भवन्तं निजगृहे ।
प्रभो प्रत्युद्याति प्रकटकृतहस्ताञ्जलिपुटा
नखज्योतिर्ज्वालावलिकलितनीराजनाविधिः ॥ ९३ ॥

(स्वगतम्) अयि भाग्यवति! लीलालक्ष्मि! प्रसन्नोऽसीति वदत्ययम् । (प्रकाशम्) लीलालक्ष्मि! पूजयामुं महापुरुषावतारमुग्रगन्धमर्घ्यपाद्यासनादिभिः । (अपवार्य) किं वदसि? "किमर्थमिदं सर्व"मिति । कश्चिदर्थोऽस्ति । (स्वगतम्) अयमद्य लीलालक्ष्मीदत्तासनादिभिरतिप्रीतः । भगवन्! किं वदसि? "कु-

न्तोऽमी जना मां न प्रणमन्ती"ति । मूढत्वात् खलत्वाच्च । किं वदसि? "वत्सोपदिश मन्त्रत्वमेतेभ्य" इति । यदाज्ञापयति भगवान् । [उच्चैः] भो भो जना महापुरुषावतारं शास्तारं खलानाममुमुग्रगन्धं भगवन्तं भवन्तः प्रणमन्तु । किं वदथ? "उपदिशास्मभ्यमेतन्मूलमन्त्रं" इति । [विचिन्त्य] मन्त्रमिमं शृण्वन्तु भवन्तः । भ्रीं भ्रीं भ्रुकुटिभीषण हाटकभूषण वक्रपृष्ठ तीक्ष्णदंष्ट्र शीघ्रप्रसादकोप गाढोत्तानितवक्त्र चण्डविक्रमाक्रम क्रूराक्ष महापुरुषावतार वञ्चनशीलावाञ्चितचित्त भगवन्नुग्रगन्ध मदान्ध स्वामिन् प्रसीद प्रसीद देवदैत्ययक्षब्रह्मरक्षश्चक्षुश्रवःपिशाचादिसर्वरौद्रमहान् संहर संहर विकटकटपूतनावेताळादीन् झटित्युच्चाटयोच्चाटय मम शत्रूंश्चूर्णीकुरु चूर्णीकुरु भूपान् दासीकुरु दासीकुरु वनिता वशीकुरु नमस्ते सर्वज्ञाय सौं षट् स्वाहा । (स्वगतम्) सर्वेऽप्यद्य यत्नस्तम्भितहासाः पठन्तो मन्त्रममुमुग्रगन्धं नमस्कुर्वन्ति । अयं चातिप्रसन्नः । (आकाशे) "इँधिन्न गहीदोह्मि दाणि कए वि अपिमासिआए में महंबह्मणें परित्ताआहिन्न" इति । हन्त! सर्वेऽपि परिभ्रान्ता एव भयेन (सभयं साञ्जलिबन्धं च) त्वरितमद्य भगवन्नुग्रगन्ध! भवतैव विप्रः पालनीयोऽयं निरङ्कुशायाः पिशाचिकायाः । किं वदसि? "तथैव करोमि भूगृहस्यान्धकारनिबिडितत्वादस्तु प्रदीपोऽपी"ति । कुटिलक! शीघ्रं दीपमानय । (स्वगतम्) दीपार्थं गत एवायम् ।

(पुनराकाशे 'ईंधि ईंधी'त्यादि पठति) आगत एव दीपहस्तः कुटिलकः। चञ्चनशीलासहोदर! गच्छ भगवतः पुरस्ताद्दीपहस्तः ।
(स्वगतम्)

प्रविशति भूगृहमधिक-
प्रवेपमानेन चरणयुगळेन ।
छादितभयः कथञ्चन
सृजन्मुहुर्मूत्रमुग्रगन्धोऽयम् ॥ ९४ ॥

कुटिलकस्तु सम्प्रति भूतलन्यस्तप्रदीपः सहस्तताळं हसन्नेवं वदति ।

"आगच्छन्त्वाशु लोका इह सफलयितुं लोचने पेचकीव
भ्रान्ता प्रेक्ष्य प्रदीपं पुनरतिविवशा कोणमथाश्रयन्ती ।
नग्नास्ते काचिदार्द्रे गुरुजघनभरं गूहमाना कराभ्यां
लज्जासंकोचिताङ्गी पिहिततनुलता केशजालैर्विकीर्णैः ॥ ९५ ॥

(इति परिहासरसजृम्भो ह्लसति च) अधुना स्वयं भगिनीमेनां विज्ञाय रदनदष्टरसनः संभ्रमस्रस्तोत्तरीयः सलज्जः कृच्छ्रात् बहिर्निष्क्रम्य द्रुतं धावति । (कतिचित् पदानि गच्छन्) हन्त! तिलशः खण्डितं वञ्चनशीलावक्त्रं भाण्डोक्त्रेण ।

रोषादथोत्पतन्तं कटकटितरटत्स्पष्टदन्तं नदन्तं
दुष्टं दृष्ट्वाप्रगल्भं कुटिलकसहजां ह्रीभयभ्रान्तचित्ताम् ।

मोदाद् भाण्डोदरं च स्फुटहसितचलत्कुक्षि नृत्यन्तमुच्चै-
र्हीहीहीहीति लोका विहितकरतलोत्तालतालं हसन्ति ॥ १६ ॥

(कुटिलकोत्तरीयमादाय प्रविश्य) (निमीलिताक्षः) वञ्चनशीले! गृहाण वस्त्रमिदम् । (नाट्येन तद्ददाति । पुनर्विलोक्य) उचितमेवेदं कृतं युष्माभिः । यद्वञ्चनशीलां हन्तुमुद्युक्तोऽयमुग्रगन्धः सपदि हठान्निगृहीतः । (स्वगतम्) अथेयं वञ्चनशीलानन्दबाष्पपरिप्लुता विगतमतिदोषा समस्तापराधं क्षमस्वेति मम पादयोः पतति । (प्रकाशम्) वञ्चनशीले! उत्तिष्ठ । उत्थिता किं वदसि?

"संरक्षिताहमिह हा विवशीकृतैवं
भाण्डोदरेण कुटिलेन वरिष्ठगोष्ठ्याम् ।
दुश्शासनेन तु पुरा द्रुपदात्मजेव
वस्त्रं प्रदाय हरिवद्भवता दयाब्धे!" ॥ १७ ॥

इति ।

अयि गुरुकुलक्लिष्टे! किमेवं निन्दसि भाण्डोदरम्? लोके हि सर्वेषां कारणं कर्मैव । तथा हि—

नित्यं दहन् विरहिणः कुसुमायुधोऽपि
दग्धः पुरा पुरभिदो नयनानलेन ।
त्वं चाखिलानपि जनानिह वञ्चयन्ती
भाण्डोदरेण नितरां बत! वञ्चितासि ॥ १८ ॥

तस्मात्‌ः परं कमपि वञ्चयिष्यामीति सत्यं कुरु । किं वदसि?

पञ्चाशद्वर्णपङ्क्तिं सकरुणमलिखन्‌ ये पुरा मेऽधिजिह्वं
प्राप्ताश्चार्था मयापि क्षितिपकुलशतैर्दुर्लभा यत्प्रसादात्‌ ।
तेषां श्रीमद्‌गुरूणां मम मनसि सदा राजिताभ्याममूभ्यां
पादाब्जाभ्यां शपेऽहं क्वचन परमितो वञ्चयिष्ये न कंचित्‌ ॥९९॥

किं च मन्मायाक्लिश्यमानान्‌ वसन्तमित्रादीन्‌ झटिति सन्तोषयामीति । अद्य त्वां प्रति रुष्टोऽयमुग्रगन्धः । (अपवार्य) किं वदसि? "व्यक्षरमात्रभणनप्रसाद्योय"मिति । तर्हि तथास्तु । इयं गतैव । (उग्रगन्धं विलोक्य) हन्तायमत्र लोकैरुत्तरीयान्तरीयाभ्यां दृढबद्धकरचरणः शेते भूपृष्ठ एव । (उपसृत्य साञ्जलिबन्धम्) भगवन्‌ भक्तेषु ते निस्सीमा करुणातिशयः । पूर्वावतारे भवतानुभूतं यशोदया कृतमुलूखलबन्धनम्‌ । इदानीं तु भक्तैरेभिः कृतमनुभूयते । किं वदसि? "सर्वदाहं भक्ताधीनोऽस्मी"ति । अस्ति किं तव व्यथानेन दृढबन्धेन? किं वदसि? "न हि न हि तथापि शीघ्रं मोचयेति" । (सहासं नाट्येन मोचयति) (उत्थाय) किं वदसि? "सकलगुणाढ्या गुणज्ञा च मद्दयिता मामेवंविधमप्युत्सृज्य कुत्सितेनानेन भाण्डोदरेण सह गूढरतिं कृतवतीति महानयं विस्मयो मे" इति । भगवन्‌ किञ्चिन्निवेदयामि ।

ईर्ष्योन्यास्वङ्गनासु स्फुरदमृतमुचश्चाटवो भूरिवित्ते
न्यक्कारो लोभयुक्ते स्तुतिमुखरमुखे नष्टसाद: प्रसाद: ।
जारे तीव्रोऽनुराग: कपटशतमहो भर्तरीति स्वभावो
वारस्त्रीणां प्रसिद्धस्त्रिजगति मतिमन्नत्र किं चित्रमस्ति ॥ १०० ॥

किं वदसि?

"वत्स! तथैव । त्वद्बुद्धिपरीक्षणार्थं मयैवमुक्तं, अद्यैव गच्छामी"ति । यद्रोचते भगवते । (भाण्डोदरहस्ताद्दण्डमादाय पुनस्तदुदर हस्तेन ताडयन्) सखे! समर्थोऽसि । कृतकृत्योऽसि । सावहित्थोऽसि । यद्वञ्चनशीलामपि वञ्चयित्वा तत्सुरतसुखमनुभूतवान् । किं वदसि? "वेश्यालम्पटं तं सुभगदीपं महामन्त्रिपदाद् भ्रंशयित्वा वञ्चनशीलावञ्चनव्यक्तावहित्थं मां झटिति तत्र न किं स्थापयिष्यति महाराज:? यत्र स्थितोऽहमपूपमोदकसहस्रैर्जठराग्नौ सदा होमं करिष्यामी"ति । कोऽत्र संशय:? आस्तामियं कथा वञ्चनशीलासङ्गेनानेन भवन्तं प्रति रुष्टा नूनमिदानीं त्वद्दयिता मण्डूकोदरी । तां किं न चिन्तयसि? किं वदसि?

"ताम्रातिह्रस्वरूक्षोत्क्षुभितखरकचां तां तुषापूर्णवक्त्रा-
मारक्तोद्वृत्तनेत्रामतिविषमकुचां काकवर्णां सिरालाम् ।
कृष्णस्थूलावलग्नश्लथिततनुपटीं मत्प्रतीकस्य कस्या-
प्यौपम्यादुद्वहन्तीं मुसलमपि वधूं नो कथं चिन्तयामि ॥ १०१ ॥

तदद्यैव तां प्रसादयितुं गच्छामी"ति । अयमपि गत एव । कल्याणकण्ठ! किं वदसि? "भवतैवाहमुन्मादाद्रक्षित" इति । भवद्भाग्येनैव । लीलालक्ष्मि! कल्याणकण्ठ! बालकोकिल! समारभ्यतां भवद्भिः संगीतम् । अहं तु कार्यगौरवाद् गच्छामि । (परिक्रामन्) चिराङ्कुरितोऽयं वञ्चनशीलावञ्चनविषयो मनोरथः कळावासमित्रलाभादिदानीं परिपूर्णः । (दक्षिणतो विलोक्य) इदं हि भवनं किसलयिन्याः । अत्र प्रविशामीति । (प्रविश्य विलोक्य)

रचयितुमनिरागं लोकचित्तं किमेत-
न्मिळितमधरबिम्बं रक्तवीटीरसाक्तैः ।
रदततिरसनाग्रैः संस्पृशन्तीयमास्ते
मणिमयरमणीयादर्शमालोकयन्ती ॥ १०२ ॥

किं वदसि? "अत्रैवोपविशे"ति । (तथा कृत्वा) अयि दयिते!

ऊर्ध्वमधस्तिर्यगपि
स्रवत्यहो कापि रक्तलहरीयम् ।
तव रमणरदनदलिता-
त्ताम्राधरतः प्रसर्पदंशुमिषात् ॥ १०३ ॥

किं वदसि? "सुन्दर! नेयं रक्तधारा, नापि शोभा । किं तु—

तव मुखचन्द्रालोका-
त्सरसोद्वेलस्य मनसि रागाब्धेः ।
निर्गच्छति लहरीयं
नितरां बहिरास्यतो ममेदानीम्" ॥ १०४ ॥

इति । (सस्पृहम्)

हेमारविन्दवदने! हिमवालुकैला-
जातीफलादिमिळितां जगदेकरम्याम् ।
आमोदिनीमधिकमाननसङ्गतस्ते
वीटीमिमां वितर मे विधिवद्रसेन ॥ १०५ ॥

इति । (तन्मुखात् स्वमुखेन ताम्बूलादानं नाटयन् । सानन्दं सश्लाघं च) सुधास्वादनेनेवेदानीं तृप्तोऽस्मि । गच्छामि च त्वात्प्रियसख्या आनन्दवल्याः स्वयंवरं निर्वर्तयितुम् । भवती मण्डिता शीघ्रमागच्छतु । किं वदसि? "तथास्त्व"ति । (परिक्रम्य पुरतो विलोक्य । साक्षिसंकोचोद्गारम्)

क्रन्दन् दाहरुजार्दितो घुरुघुरारावेण कृष्णारुणै-
र्विस्फोटैः कृमिवर्गवासभवनैः शोफाञ्चितैरावृतः ।
क्षुद्वेगेन निरङ्गुलव्रणगणव्याकीर्णहस्तस्रवत्-
पूयार्द्रीकृतमेव तण्डुलमयं कुष्ठी समश्नात्यहो ॥ १०६ ॥

(आवकेण मार्गेण त्वरिततरं परिक्रम्य) हा! साधुमिन्द्रावधान्यद्रविणहर-

णादिभिरयमेवं जातः कर्मभिः स्वैरेव । एतन्मोचनार्थं से-
वनीयस्तावदुद्यन् सर्वदेवात्मा भगवान् द्वादशात्मा । (साञ्जलिबन्धम्)

कुर्वाणाः श्लिष्टदोषायुवतिततमोवेणिकासंयमार्थ-
प्रोद्युक्तारक्तराजाहिवसवरकरोद्भासिभासक्ष्यशङ्काम् ।
नॄणां निघ्नन्त्वविघ्नं त्वरितमिनभवास्ते नमश्चक्रिचक्रा
विक्रोशच्चक्रचक्राशयविहितसुधावृष्टयो वृष्टयोऽह्नः ॥ १०७ ॥

कुर्वाणाः पूर्वभूभृत्खरशिखरनभोगोळकाळायसौघा-
न्योन्योत्पन्नोग्रसंघट्टनभवविततोषर्बुधभ्रान्तिमन्तः ।
कुर्युस्ते सूर्यजा वः श्रियममिततमःश्यामवासो दहन्तः
सन्तप्ताङ्गारशङ्काङ्कुरकरविलसन्मेघलेखा मयूखाः ॥ १०८ ॥

कुर्वाणा ध्वान्ततीक्ष्णाश्मनपरिकलनामीलिताम्भोजनेत्रो-
न्मेषार्थाब्जाक्षराजत्करलगदगितोत्क्षिप्ततोयौघशङ्काम् ।
उद्गच्छन्तोऽम्बुराशेर्दशदिशि शतशो घ्नन्तु विश्वैकदृश्याः
सप्ताश्वस्याश्वशेषाशुभचयमिह वस्तेंऽशवः किंशुकाभाः ॥ १०९ ॥

(इति स्तुवन् पुनर्वामतो विलोक्य) इदं खलु कळहंसिकाधाम । तदन्तः-
प्रविशामि । (इति प्रविश्य विलोक्य) अये हिरण्यमणिमण्डनानि
मण्डयन्तीयमत्रास्ते विशङ्कटे व्रणकटे । इदानीं तु—

परिहसति गळोऽस्याः सक्तमाणिक्यनिष्को
मधुभिदधरशोभालाञ्छितं पाञ्चजन्यम् ।

अधरकिरणसङ्गाद्धारुणो घ्राणमुक्ता-
मणिरपि गिरिकन्याद्धाङ्गमर्द्धेन्दुचूडम् ॥ ११० ॥

अद्य तु । कनककटकमुखरिताभ्यां, मणिमयाङ्गुलीयकमरी-चिवीचीविचित्राभ्यां करशतपत्राभ्यां सुवर्णकुण्डलं योजयति कर्णेन । (उपसृत्य)

केशप्रभाजितघनां कळहंसिके! त्वां
श्यामापदं निगदितुं रचितां घनेन ।
आयाति कुण्डलमिषात्तव कर्णमूलं
हेमाम्बुजं प्रियतरं कळहंसिकानाम् ॥ १११ ॥

किं वदसि? अये भाव! अत्रैवोपविशे"ति । (तथा कृत्वा विलोक्य स्वगतम्)

स्निग्धश्यामाल्परोमाङ्कुरनवनखराङ्काङ्किते पङ्कजाक्ष-
श्रीमूले बाहुमूले जननयनफले मन्दमादर्शयन्ती ।
रत्नस्वर्णप्रणीतस्फुटसुमततिनीरन्ध्रशोणाभतन्तुं
कण्ठे गाढं कराभ्यां किमपि नतमुखी साधु बध्नाति सुभ्रूः॥११२॥

(नाट्येन नूपुरद्वयं हस्तद्वयेनादाय) अयि बालिके! कळहंसिके!

हेम त्वत्तनुकान्तिमत्सरमहादोषादिदं पावके
पातैर्हन्त! सुवर्णकाररचितैःसंताडनैर्भेदनैः ।

तीव्रं दुःखमिहानुभूय विवशं मञ्जीरतां प्राप्य ते
पादाब्जाश्रयणाय संस्पृहयते तन्वि! त्वमङ्गीकुरु ॥ ११३ ॥

किं वदसि? "भाव! भवानेव लोके चाटुपटुः" इति । (नाट्येन त-
च्चरणे मञ्जीराभ्यां मण्डयित्वा । करेण काञ्चीगुणमादाय)

यन्मोक्ष एव सततं हृदये स्पृहा मे
नैवानया रशनयाद्य भवन्नितम्बम् ।
बध्नामि तन्वि! भवमोक्षरसैकलोलाः
किं योगिनोऽद्य भवबन्धपरा भवन्ति ॥ ११४ ॥

इति ।

(नाट्येन काञ्चीगुणं दत्वा पुनर्विलोक्य स्वगतम्) अये समुचितप्रती-
यम् । (प्रकाशम्) अयि कळधौताभरणगणरणितानुकृतकळहंसि-
काकळकळे! कळहंसिके!

दुग्धाब्धिरस्ति जघने सितवस्त्ररूपी
रोमावलीप्रसरदंशुमिषाद्धरिस्ते ।
लक्ष्मीश्च हेमरशनाच्छलतस्तदेतन्-
पुत्रोऽत्र कुत्रचिदपि प्रमदे! दृढं स्यात् ॥ ११५ ॥

(सलज्जम्) किं वदसि? "अलमलं नर्मालापैः । अहं तु गच्छामि
सखीस्वयंवरमण्डप"मिति । तथास्तु । वयमपि साधयामः ।
(इति परिक्रम्य दक्षिणतो विलोक्य सविस्मयम्) अत्र हि महानुकूलचरा

विहङ्गमैरप्यगम्यशृङ्गः प्रदत्तजननयनप्रसादः प्रासादः । (ऊर्ध्व-मवलोक्य)

सौधेऽस्मिन् दीपमाला रजतशफलकानूष्मभिर्द्रावयन्ती
केयं मौलिस्थधूमा लसति तत इतः स्वाङ्गसङ्गिस्फुलिङ्गा ।

(निपुणं निरूप्य)

एषा लावण्यलेखा सितहसितवती मस्तकाबद्धवेणी
रत्नालङ्कारदीप्ता क्षणमहमनया वञ्चितश्चञ्चलाक्ष्या ॥ ११६ ॥

इयमद्य वलभीतलमभ्यन्तरमेव गता । तत् प्रविशामि ।

(प्रविश्य विलोक्य)

सूक्ष्मेन्द्रोपलसूचिकाणुशकलन्यक्कारिभिः श्मश्रुभिः
क्लीचितैरिव कामपावकचलद्धूमासितैश्चुम्बितः ।
हेमाभश्रुतिसक्तकृष्णनयनः सल्लक्षणः सत्त्ववा-
नङ्कस्थापितवल्लभोऽत्र मतिमान् मन्त्रीश्वरो दृश्यते ॥ ११७ ॥

अपि च—

अयमिह कुचकुम्भे चन्दनार्द्रे वितन्व-
न्नरुणनखमयूखैः कुङ्कुमालेपलक्ष्मीम् ।
सरसमुरसिजाग्रं मर्दयन्नङ्गुलीभ्यां
सुखमुकुलितनेत्रामुत्तमां श्लिष्यतीमाम् ॥ ११८ ॥

अहो महानयं महामतेर्धीरस्याप्यस्य मन्मथकृतश्चित्तविभ्रमः । यतः सुस्निग्धानप्रतिमबलपराक्रमान् जीविकालाभादितः शत्रुप-

क्षं गताम् दीर्घबाहुप्रमुखांश्च भूपतीन् तत्कृतमात्मनस्तीव्रमयश-श्चाचिन्तयन्नेवं नक्तन्दिवं वेश्यालालनैकतत्परः ऽत्र जानाति स-न्निहितमप्यतिप्रबलं शत्रुं चण्डसेनम् । (उपसृत्य) स्वस्ति भवते महाराजमन्त्रिराजाय । (सहासम्) किं वदसि? "समीप एवात्रोपविशे"ति । (उपविश्य विचिन्त्य—स्वगतम्) अद्यैवं वदामि ।

(प्रकाशम्)

कार्यार्थिभ्यो जनेभ्यो जनयति परमं स्वास्थ्यमैश्वर्यसौख्यं
येषां भूपाविशेषा ददति च गणिकानित्यसंभोगतोषम् ।
मन्त्रीन्द्रास्ते ऽब्धिकन्यामपि कठिनशिलान्यस्तलेखास्थिरान्तां
निश्चिन्वन्तो यतिभ्योऽप्यधिकमिह गताहन्त! नैश्चिन्त्यसौख्यम् ११९

(स्वगतम्) हसत्यथायं मन्त्रीन्द्रः । लावण्यलेखे! किं वदसि? "सत्यमेवोक्तं भवते"ति । (मन्त्रीन्द्र प्रति) महात्मन्! ना-यमवसरो मन्दहासस्य यत् भवत्स्वामिनो भद्रसेनस्य कीर्ति-मिव प्रियामानन्दवल्लीं हठादपहर्तुमत्रागत एव चण्डसेनः पा-ण्ड्यभूपः । (सहासम्) किं वदसि?

"पटुरसि लालितेऽस्मिन् कामतन्त्रप्रयोगे
न तु विषमगभीरे राजनीतिप्रयोगे ।
चलयति लतिका यो मन्दमत्यन्ततन्वीः
स कथमिव समुद्रान् क्षोभयेन्मन्दवातः ॥ १२० ॥

अतस्त्वमेवं वदसी"ति । (सगर्वम्) एवंविधाद्भवतोऽहमेव पटु

राजनीतिप्रयोगे । चारमुखेन शत्रुप्रवृत्तिं विज्ञाय तत्प्रतिक्रियां कृतवान् । किं वदसि? "अदृष्टचरमश्रुतचरं च ते प्रावीण्यं दण्डनीतौ । यद्विश्वताविस्रादप्यतिगूहनीयं मन्त्रं, महाराजेन दत्तं महार्हाभरणमिव विविक्तजनसंसदि प्रकटितवान्" इति । (सलज्जं स्वगतम्) आः इन्द्रजालदर्शनोत्सुकानां नानाजनानां पुरत एव लघुहस्तो मयोक्तः "त्वया शत्रुबाधा शमनीया" इति । (प्रकाशम्) मन्त्रिवर! तेन किमनर्थो जातः? किं वदसि? "शृणु स लघुहस्तस्त्विदानीं चारनेत्राणां शात्रवाणां वशं गत" इति ।

प्रभो! तर्हि स्वयंवरविघ्नभयेनाहमिदानीं नितान्तं संभ्रान्तोऽस्मि । तत्त्वरितं भवानेव समुत्तिष्ठतु शत्रुनिग्रहाय । (ससान्त्वम्) किं वदसि? "अलमलं ते भयसंभ्रमाभ्याम् । यन्नागत एवात्रास्माकं शत्रुश्चण्डसेनः" इति । मन्त्रीन्द्र किमेवमजानन् वदसि? अत्र सन्निहित एव चण्डसेनः । सत्यमेवेदम् । (सहासम्) किं वदसि? "नागत एवे"ति । "सकृन्मया किं नोक्तम्? किं पुनरेवं परिभ्रमसी"ति ।

(आकाशे महान् कलकलः सभयसंभ्रमम्)

श्रीरामस्थिरबद्धमुष्टिविकटाकृष्टयुग्रवेगानम-
त्त्र्यम्बकनिर्भरभीमधूर्जटिधनुर्घोरध्वनिस्पर्ध्यथम् ।
अत्रागच्छति चण्डसेननृपतिं युद्धार्थमभ्यागतं
वक्तुं त्वां चतुरङ्गभैरवचमूभेरीगभीरारवः ॥ १२१ ॥

त्वरिततरमुत्तिष्ठतु भवान् शत्रुनिग्रहाय । अन्यथापरिमितः प्रजाक्षयः स्यात् । (स्वगतम्) "हंधि हंधि मं परित्तायाहि परित्तायाहि" इति वदन्ती भयसंभ्रान्तेयं लावण्यलेखा । (प्रकाशम्) मन्त्रीन्द्र! किं वदसि?

पटहकटुनिनादाकर्णनोद्भ्रान्तकान्ता-
दृढतरकुचकुम्भालिङ्गनामेयसौख्यम् ।
अधिकमधिगतोऽहं भूरिभाग्यादिदानीं
हर इव गिरिकन्याश्लेषतोषं धृतेऽद्रौ ॥ १२२ ॥

इति । अतियुक्तोऽयमवसरस्ते कान्ताश्लेषसुखमनुभवितुम् ।

(आकाशे कलकलानन्तरम्—)

"सैन्यं किंचन जन्यकौतुकि नदीवेगोल्बणस्यन्दनं
युक्तं नागशतैश्च सैन्धवमयं गम्भीरघोरारवम् ।
अत्राक्रामति चण्डभास्करतिरस्कारक्षमक्ष्मातटी-
धूल्युद्धूननहेतुतो ह्यपि चलत्पाथोधिभेदं त्विदम् ॥ १२३ ॥

हा! ये पुरा महाराजभद्रसेनस्य महामात्यसुभगदीपस्य च वेश्यालम्पटत्वदोषाज्जीविकालाभेन इतो गतास्त एव दीर्घबाहुप्रभृतयोऽद्य शत्रोश्चण्डसेनस्य सेनानायका दृश्यन्ते । अतिप्रचण्डा सेनेयं नूनमस्मान् झटिति ध्वंसयिष्यति । कं वा शरणं व्रजामः । केदानीं महामात्यमहाराजौ । किं निद्रितावुत पानमदमत्तौ शयाते" इति । मन्त्रीन्द्र! भवता

भयाकुलानां, जनानाममूनि विषबिन्दुतुल्सह्यान्यक्षराणि किं न श्रुतानि? किमद्यापि स्तम्भवशिष्क्रियो वर्त्तसे । (स्वगतम्) अ-द्याप्ययं मन्दहासं करोति । (पुनराकाशे हाहाकारानन्तरम्)

स्थूलोदस्ताः महस्ताहतिभिरुपवनं भञ्जयन्तोऽङ्गनानां
गर्भान् विस्रावयन्तः पृथुनलिकभवध्वानघोरैर्विरावैः ।
दन्तीन्द्रा दन्तसंघट्टितकठिनदृषत्कुड्यतोऽग्निं गृहाणां
दर्पादुत्पादयन्तो मदसलिलझरैर्नाशयन्तोऽभियान्ति ॥ १२४ ॥

महाराजमन्त्रिराजयोः करग्रहण एवाभिद्रुता, न तु रक्षणे । तद्विद्रवामः । अथवा विषं भक्षयामः उताग्नौ प्रवि-शामः । अन्यथास्मान् शत्रवः प्रगृह्य अतिदण्डनेनैव हनिष्य-न्ति इति । (स्वगतम्) हा मूर्च्छितैव भयेन सम्प्रतीयं लावण्य-लेखा इति । (ससम्भ्रममुत्थाय, कतिचित्पदानि गच्छन् बन्धनं नाटयन्, पृष्ठतो विलोक्य) हन्त! सहासेन सुभगदीपेनाहं कराभ्यां निगृहीतोऽस्मि (सरोषसंभ्रमं प्रकाशम्) मुञ्च मुञ्च (आकाशे) भो! जनाः सूक्ष्मार्थ-मनालोकयन्तो महाराजं मन्त्रीन्द्रं च वृथैव निन्दन्तः किमेवं भवन्तः परिभ्रमन्ती"ति । (स्वगतम्) महाराजमन्त्रिणस्तीक्ष्णबु-द्धिरिवेयमतिगम्भीरा वाणी श्रूयते । (पुनराकाशे) "भो भो जनाः!

इत्रश्वभूपतिभिरस्य तु दीर्घबाहु-
मुख्यैरयं सुभगदीपनयाभिबद्धः ।
म्लेच्छः स भद्रभटमुख्यभटैरिव प्राक्
चाणक्यनीतिबलतस्तदलं, विषादैः" ॥ १२५ ॥

इति ।

(सानन्दविस्मयलज्जं स्वगतम्) अहो! महामतेरतिगम्भीरस्यास्य नयेनैव महाबलः शत्रुरयं निगृहीतः। संभ्रान्तोऽहं तु कराभ्यामेव। (प्रकाशम्) मन्त्रीन्द्र! मुञ्च माम्। पदात् पदमपि न चलामीदानीम्। (स्वगतम्) विमुक्तोऽहमद्यानेन।

(प्रकाशं सबहुमानं साञ्जलिबन्धं च)

नृणां दुरूहचरितः सुदृढावहित्था-
शाटीतिरस्कृतिवशादखिलं च लोकम्।
एकः परिभ्रमयसे नयसारधारी
पाञ्चालिकागणमिवाद्भुतयन्त्रधारी ॥ १२६ ॥

(सहासम्) किं वदसि? "गच्छ गच्छ आनन्दवल्लीस्वयंवरं निर्वर्तयितुं त्वमेवात्र सर्वाध्यक्षः कृतो महाराजेन। अहं तु मूर्च्छितामिमां सान्त्वयामि" इति। यदाज्ञापयति मन्त्रीन्द्र इति।

(परिक्रम्य पुरतो विलोक्य)

पृथ्वीमानमयन्नयं गुरुपदन्यासैः समं मूर्धभिः
शत्रूणां हृदयैः सहैव निशितं खड्गं मुहुः कम्पयन्।
उत्तुङ्गस्तनुमध्यमो द्रुतगतिर्विस्तीर्णवक्षस्तट-
श्चित्रोष्णीषधरोऽत्र लोहकवचः कश्चित् समागच्छति ॥ १२७ ॥

(निपुणं निरूप्य) अये अयं सेनापतिर्वीराग्रणीर्दीर्घबाहुः। (उपसृत्य) सखे! दीर्घबाहो! कुत्रेदानीं चण्डसेनः? किं वदसि?

"'कारागृह"' इति । किमर्थमत्रागतोऽसि? किं वदसि? "मन्त्रीन्द्रं सुभगदीपं किंचित् कार्यं विज्ञापयितुं, नायमवसरस्ते प्रभशतस्य बहूनि कार्याणि मे सन्ति । तद् गच्छामी"ति । अथ त्वरितं गत एव निर्दाक्षिण्यक्ष्मापतिः । (इति परिक्रम्य दक्षिणतो विलोक्य) इदं हि स्फटिकमणीतोरणतुङ्गप्रपरिवेष्टितं, स्वच्छपारिहासितासितसिकतानीरान्वितारुणविलसन्मालतीमल्लिकादिकुसुमितलताकुञ्ज-भृङ्गमालाझङ्कारमुखरित, मङ्गनाविटशतसंकुलं, विचित्रवितानाशिल्पमालाधूपादिभिस्त्विमतिविस्तीर्णं मणिमयमानन्दवल्लीस्वयंवरमण्डपमालोक्यते। अये समागच्छतीयं च त्रहस्ता मदायिताचेटी । अयि कस्येदं वस्त्रद्वयम्? किं वदसि? "भवत एवोत्तरीयान्तरीये" इति ।

(देहीति नाट्येनादाय वस्त्रं यथोचितं धारयित्वा अन्यत् तत्करे ददाति)

किं वदसि? "अयि किमपि संदिष्टं स्वामिन्या भवन्तं बोधयितु"मिति । (सादरम्) किं तत्? किं वदसि? "मम कापि शिरोवेदना । तत्तत्र मदनागमनाद्यदि भवेद्बन्धूनां वैमनस्यं तर्हि चाटुभिस्तद्भवतैवापनेयमिती"ति । (स्वगतम्) स्वभाव एवायं मानिनीनां यदत्यादरपरीक्षणम् । (प्रकाशम्) तथास्तु शीघ्रं गच्छ तस्याः शुश्रूषणार्थम् । तां चैवेवं वद । जवादहमागमिष्यामीति । इयं गतैव । (द्वारावधि परिक्रम्य) वेश्यागमनं पश्यन्नत्रैव तिष्ठामि । (तथा कृत्वा पुरतो विलोक्य) इदानीं तु, कटाक्षच्छटाश्यामलीकृतमधरशोभारुणितं मन्दस्मितधवलितमङ्गरागसुरभितं वराभरणरणितमुखरितं च दिक्चक्रवालं कुर्वन्ति

विटचेटसंकुलानि दत्तसकलतरुणमोदान्यङ्गनामण्डलानि शतशः समागच्छन्ति प्रविशन्ति चान्तर्गृहम् । (सकौतुकम्) अद्य सह-चरीभिः सह सहेलमायाति सहजसौन्दर्यानुकृतकमला कमला-वली ।

दयितविरहहेतोर्दर्शनं चास्य मा भू-
दिति करतलराजत्तालवृन्तेन तन्वी ।
दिनपतिमतिवेलं छादयन्ती कटाक्षै-
र्दिशि दिशि जनयन्ती ध्वान्तमेषा विभाति ॥ १२८ ॥

इयमुपागतैव । कुत्र ते भर्ता ? किं वदसि ? "शून्यस्य गृहस्य रक्षार्थं मया तत्र स्थापित"इति । अभ्यन्तरं प्रवि-शतु भवती । (स्वगतम्) इयमिदानीमानन्दवल्लीसखीसमुपदिश्य-मानमार्गान्तर्गृहं गता । (पुनर्विलोक्य सानन्दम्)

अस्या वक्त्रेन्दुशोभाक्षतिरिनकिरणैरद्य मा भूदितीव
छत्रेणाळ्या सकेळ्या स्थगितरविकरा याति मातङ्गयाना ।
एषा लीलाविलोलोज्ज्वलकरविलसत्कङ्कणोल्लासिनादा-
कृष्टासत्कर्णदृष्टिः स्मितविजितशरच्चान्द्रिका चन्द्रलेखा ॥ १२९ ॥

अयि! कान्तस्त्वया किमिति नानीतः ? किं वदसि ? "अतिचपलचित्तस्य तस्य स्त्रीसंघातदर्शने महान् दोषः स्या-दिती"ति । तर्हि स कुत्रेदानीम् ? किं वदसि ? "मया

खट्वापादे मालतीमालया बद्धः क्षेपे" इति । (स्वगतम्) अहो सुन्दरीणां कामिष्वनर्गळः प्रभावः । इयमप्यानन्दवल्लीसखीजनसादरकृतकुशलप्रश्ना प्रविष्टान्तर्गृहम् (पुनः सश्लाघम्) आगच्छतीयं सखीकरकमलभ्रमितवालवृन्तानिलव्यतिकरेषन्मुकुळिताक्षी सौभाग्यलक्ष्मीः ।

आस्यस्यास्याः सरोजप्रकररुचिमुषो म्लापनार्थं प्रकोपा-
दुद्युक्तं पद्मबन्धोः करमहिमरुचः स्वोत्तरीयाञ्चलेन ।
कान्तं संवारयन्तं प्रणयपरवशा वामनेत्रेण मन्दं
पश्यन्तीयं हसन्ती मृदु हसति लसद्भाग्यसौभाग्यलक्ष्मीः ॥ १३०॥

किं वदसि ? "चिराय दृष्टो भाव" इति । सत्यपि सर्वदा भवत्सन्निधावासितुमभिलाषे कार्यगौरवादितस्ततः परिभ्रमन् नयामि नक्तंदिवम् । किं वदसि ? "इतः परं कदा भावदर्शनं मे स्या"दिति । श्व एव । इयमानन्दवल्लीसखीजनसादरगृहीतपाणिपल्लवान्तर्गृहं गतैव । अये कतिपयभटपरिवारितः संदृश्यतेऽत्रैव मन्त्रीन्द्रः सुभगदीपः ।

आस्यं यस्य प्रकृतिसुभगं बिन्दुसिन्दूरचित्रं
दृष्ट्वा कामात् स विधुरभवद्विभ्रराजो गजास्यः ।
अक्लान्तं करिवरममुं बन्धुरं मदान्धं
मन्त्रीन्द्रोऽयं जयति वशमितं यथा विघ्ननागम् ॥ १३१ ॥

करीन्द्रादवरुह्य इत एवाभिपतति मन्त्रीन्द्रः (ससंभ्रममुपसृत्य) स्वस्ति मन्त्रीन्द्राय । किमर्थमत्रागमनं भवताम् ? किं वद-सि ? "भवन्तं द्रष्टुमेवे"ति । किं प्रयोजनम् ? किं वद-सि ? "वाचयेदं पत्र"मिति । (नाट्येन तदादाय बहिर्विलोक्य वाच-यति) 'स्वकार्य'मिति । (अन्तर्वाचयति)

"सुभगपुरुषैश्चित्तन्यस्तैः स्वयंवरमण्डपं
तदतिनिबिडं स्त्रीणां चेतः प्रतिक्षणचञ्चलम् ।
मुहुरपि सखे ! सञ्चिन्त्यान्तः प्रियाधिगमं प्रति
त्रुटितहृदयैः सन्देहौघैः समाकुलितोऽस्म्यहम् ॥ १३२ ॥

तत्सद्य एव त्वया वक्तव्यः शृङ्गारसारः स खल्वधिकस-मर्थः सुन्दरीणामनुरञ्जने चन्द्रादपि वसन्तादपि मन्मथादपि । इति लिखितमिदमस्मत्सुभगदीपाय भद्रसेनेने"तीति । किं व-दसि ? अत्र प्रतिकूलोऽयं मानुषश्चण्डसेनः कथञ्चिन्मया वा-रितस्तद्यदि भवेत् भगवान् देवोत्तमो मन्मथस्तर्हि तद्वारणाय नाहं शक्तः किन्तु भवानेवेति । (स्वगतम्) नूनमत्रायं जन एव सकलपुरुषतत्त्ववक्ता स्यात् । तदा दृढमिदं कार्यं घटयितास्मि । (प्रकाशम्) महाराजकार्यार्थमहं सर्वात्मना यते । किं वदसि ? "तथा चेदलम् । गच्छाम्यहं महाराजं भवद्वचनैः सान्त्व-यितुं दीर्घबाह्वादीन् सम्मानयितुं च" इति । तथास्तु । गत एवायं करीन्द्रमारुह्य मन्त्रीन्द्रः । पूर्ववत्तिष्ठामीति । (परिक्रम्य) मदभिमुखमागच्छत्ययं परार्द्धप्रभुः । परार्द्धप्रभो

किं वदसि ? "कुतो नात्र दृश्यते भवद्दयिता शृङ्गारलहरी"ति । शिरोवेदनया । किं वदसि ? "हा धिक् हा धिक् । दीपशिखाभावे निशाभोजनवन्न शोभायै तस्या अभावे बहुगुणोज्ज्वलोऽप्ययं स्वयंवरमहोत्सवः । तदधैव वैद्यान् शिबिकां च प्रेषयामी"ति । अयं गत एव । (पुरतो विलोक्य सानन्दम्) अहो अत्रैव विचित्रकञ्चुकावृता विविधविलासवशीकृतविश्वा विश्वमोहिनी दृश्यते । पृष्ठतश्चास्या गुणैराकृष्यमाणास्तरुणाः शतशः समागच्छन्ति ।

तन्वीयं तान्तमध्या सततभृशतरोज्जृम्भणं वारयन्ती-
वैकं विन्यस्य हस्तं स्तनघटतटयोरादरेणेतरेण ।
आलीहस्तं गृहीत्वा रुचिजितशरणापन्नपङ्केरुहाभं
मन्दं मञ्जीरमञ्जुस्वनमुखरपदन्यासमायाति सुभ्रूः॥१३॥

एतन्मनुलतास्पर्शनाय वपुषा किञ्चित् पिहितद्वारः निम्नामीति । (तथा कृत्वा) अयि विश्वमोहिनि ! किन्नातीतमानन्दवल्या गिरिजावन्दनम् ? किं वदसि ? "अतीतप्रायम् । अहं त्वत्र सर्वसंभारसंभरणाय पूर्वमागते"ति । इयमिदानीं स्वसखीजनप्रक्षालितचरणकमला सव्याजं वामस्तनकलशस्पर्शेन मामानन्दयन्ती प्रविष्टैवान्तर्गृहम् ।

अङ्गीकृता वयमधःकृतसिन्धुपुत्र्या
हन्तानयेत्यतिहसद्भिरिव कणद्भिः ।

आच्छादिता मणिमयाभरणैर्मनोज्ञै-
रायाति काचिदिह मन्थरमायताक्षी ॥ १३४ ॥

(निपुणं निरूप्य) अये इयं रत्नाङ्गी इदानीमन्वर्थसंज्ञा जाता । मामेवं पिहितद्वारं विलोक्यान्यद्वारेण गन्तुमुद्युङ्क्ते । तदितः किञ्चिदपसर्पामीति । (तथा कृत्वा) अयि बाले ! प्रविशानेनैव सन्निहितेन द्वारेण । किं वदसि ? "ओ"मिति । सलज्जा संभ्रमेणेयमन्तर्गता । अये बालिका रसकलिका ।

भग्नान् सान्त्वयितुं सहेळमळकानग्रैकहस्ताङ्गुली-
श्रेण्या दर्शितबाहुमूलसुभगं मन्दं स्पृशन्ती मुहुः ।
आयात्यन्यकरस्फुरज्जलरुहा संताडयन्ती सखी-
मेषा हासलसन्मुखीं सकपटं मय्यर्पयन्ती दृशौ ॥ १३५ ॥

इयमद्य सखीहासजनितया महालज्जया संभ्रमेण च विवशीकृता त्वरितमन्तर्गता । आगच्छतीयममन्दसौन्दर्यतुलितसर्वमङ्गळा मङ्गळमाला ।

यूनां केशादिपादेक्षणपरमनसां सत्कटाक्षाङ्कुशौघै-
राकर्षादुत्तरीयं मुहुरपि गळितं वामहस्ताम्बुजेन ।
एषा बालार्पयन्ती कुचमुकुळतटे दक्षिणे हस्तगर्भे
रत्नादर्शं दधाना परिलसति नृणां नेत्रमोदं दधाना ॥ १३६ ॥

इयमत्र मां विलोक्यान्यद्वारेण प्रवेष्टुमुद्युङ्क्ते । तदेवं वदामि । अयि बाले ! नाहं शत्रुस्तदित एव प्रविश ।

(स्वगतम्) इयमद्य मद्वचनमनाकर्णयन्तीवान्यद्वारेण प्रविशत्यन्तःगृहम् (मंगळवाद्यघोषश्रवणं नाट्यन् विलोक्य) अद्य तावदागच्छति विविधवीरपुरुषपुरस्सरा वेणुवीणापणवादिराणितपूरितदिक्चक्रवाळा सखीहस्तोद्धृतोत्तमच्छत्रापहसितपूर्णशशिमण्डला परिसरस्थितसखीमण्डला पृष्ठानुसृतापरिमितस्त्रीपुंसा सर्वजनैः सानन्दविस्मयं विलोक्यमाना रत्नशिबिकारूढानन्दवल्ली । अहो! अपरिमितमेवैश्वर्यं परार्द्धप्रभोः । तथा हि ।

आस्तामश्वकुलं पुरस्सरमिदं मातङ्गयूथं भट-
व्यूहः स्यन्दनवृन्दमद्भुतनरं भूषागणैरुज्ज्वलम् ।
एकस्यापि न लम्भितं खलु जनैरत्रैकचेटीकर-
भ्राजत्रातरराङ्गुलीयकलसद्रत्नस्य मूल्यं भुवि ॥ १३७ ॥

इयमद्य सख्योः पाणिपल्लवे करकमलाभ्यां गृहीत्वावरूढा शिबिकायाः ।

एषा सानन्दवल्ली विलसति विधिना वल्लभाभ्यर्थनं च
त्यक्त्वा नुन्नेन पुण्यैरिह धरणिपतेर्या कृतां वीक्ष्य सेर्ष्यम् ।
भर्त्रा श्रीर्लेखितागात् सलिलनिधिमुमा पर्वतं भारती तु
क्रोधान्धा चाद्य पत्यौ मिषति मुखमहागह्वरान्ते जनानाम् ॥ १३८ ॥

किं च—

केशे शेषां शिवायाः सुरभितभुवनां पुष्पमालां दधाना
फाले मालेयपङ्कं विपुलकटितटे वाससी सोमशोभे ।

भूषाश्चापादचूडं कनकमणिकृताः शिञ्जिताकृष्टहंसा
लज्जाभावानुमेयाधिकतनुवसनाच्छादनायाति मुग्धा ॥ १३९ ॥

इयमद्य किञ्चिन्म्लानमुखशोभा दृश्यते । नूनं मद्दयिता-नागम एवास्याः शोकहेतुः स्यादत्यासन्नाभ्युदयायाः । (शिबिका-वाहकहुंकारश्रवणं नाटयन् विलोक्य सानन्दम्) इयमिदानीमवरुह्य शिबिकायाः समागच्छति सखीभिः सह मद्दयिता ।

तनुतरभूषाप्येषा
तरुणानां लोचनानि सहजगुणैः ।
आकृष्य सफलयति पुन-
रन्यस्त्रीणां गुणांश्च विफलयति ॥ १४० ॥

किं च—

विलोक्य स्त्रीसंघैर्निबिडितमिदं मण्डपमियं
प्रवेष्टुं धीराणामधिकगहनं चित्तभवनम् ।
कटाक्षैस्तीक्ष्णैः स्वैर्झटिति दृढधैर्याभिधमहा-
कवाटं भिन्दाना परिलसति शृङ्गारलहरी ॥ १४१ ॥

अथेयं च प्रसन्ना प्रियसखीदर्शनेनानन्दवल्ली । (उपसृत्य) कान्ते शान्ता किं ते शिरोवेदना । किं वदसि ? "शान्ते"ति । आनन्दवल्लि ! अन्तर्गृहं प्रविशामः । किं वदसि ? "यद्रोचते भावाय" इति । अथ मद्दयितादक्षिणपाणिप्रवाळगृहीतवामकर-

कमला इतरकरविराजत्कल्हारमाला सुगन्धितिलजनिषेकदेदीप्यमानदीपिकाचक्रशोभितमभिमयपात्रशोभितपाणिपद्मेन सर्वावयवभूषितेनोत्तमस्त्रीपङ्क्तिद्वयेन मण्डितपुरोभागा लाजकुसुमपल्लववर्षिणीभिः सखीभिः सह सतूर्यघोषं प्रविशत्यन्तर्गृहम् । तत्प्रविशामीति । (प्रविश्य विलोक्य)

आनन्दवल्लीगुणदर्शनोद्य-
दानन्दसंस्तम्भितमूर्तयोऽमी ।
इहासते चित्रमिषादनेके
महीश्वरामात्यविटादिमुख्याः ॥ १४२ ॥

(पुनर्विलोक्य सविस्मयम्) अहो अत्र स्वयमेवागतो भद्रसेनमहाराजः । (निपुणं निरूप्य) इदं हि महाराजस्योत्कीर्णं रूपम् । पराद्धप्रभो ! किं वदसि ? "भाव ! भवानद्य किमुदासीनस्तिष्ठति ? वदतु सर्वेषाममीषां पुरुषाणां तत्त्वम् । अन्यथा कथमस्या बालायास्तद्बोधः स्या"दिति । यद्वोच्यते पराद्धप्रभवे । (आनन्दवल्लीं प्रति) अयि बालिके ! वदाम्यमीषां तत्त्वम् । यत्र ते रुचिस्तं वरय ।

'नेपालो'यं नृपालो बहुळमृगमदामोदितं यस्य राष्ट्रं
'बूट्टान्'भूपः परोऽयं जिनमतनिरतो देवराजाभिधानः ।
एष श्रीमान् 'विहार'क्षितिपतिरतुला यस्य हि स्युर्विहाराः
कालिन्दीजह्नुकन्याजनकजनपदस्त्वेष 'घर्वाट्'महीन्द्रः ॥ १४३ ॥

'काश्मीर'क्षितिप स्थलाम्बुजलसद्राज्योऽयमत्युज्ज्वलं
यस्य 'श्रीनगरं' प्रधाननगरं 'बून्दी'नृपोऽयं कविः ।
'पट्याल'क्षितिपोऽय'मिन्दुपुर'पः श्रीनर्मदा-शर्मदा
यद्राज्ये विलसत्ययं नरपति'र्माहिष्मतीवल्लभः' ॥ १४४ ॥

'उदयपुर'नृपः श्रीरामवंशोद्भवोऽयं
'भरतपुर'नृपोऽयं त्वेष 'भोपाल'भूपः ।
'धवळपुर'नृपोऽयं तन्वि ! 'चंबा'नृपोऽयं
'जयपुर'पतिरन्योऽयं हि 'कोलापुरे'शः ॥ १४५ ॥

'वज्राङ्कुराङ्कितधरातल'नायकोऽय-
मिन्दुप्रसन्नमुखि ! 'वन्दळ'भूपतीन्द्रः ।
'सिन्ध्या'नृपोऽयमतुलो'ज्जयिनी'पुरेशः
'पाण्ड्यो'यमत्र निगळैरिह यो निबद्धः ॥ १४६ ॥

यं दृष्ट्वायं वसन्तो वनमधिवसति ह्रीभरादम्बरान्तं
चन्द्रो मन्दाक्षचेलावृतमसमशरः स्त्रीजनानां हृदन्तम् ।
राजायं केरळेन्द्रः सकलगुणनिधि'र्भद्रसेनो'ऽस्य कण्ठं
पुण्याळ्ये ! मण्डय त्वं दरनिभमनया मालया मालयस्य ॥१४७॥

(स्वगतम्) इदानीमियं लज्जाकुला भद्रसेनप्रतिमाकण्ठभागे कथंचित् समर्पयति वरणस्रजमानन्दवल्ली ।

युक्तं कामं रतिरुपगता भारती पद्मयोनिं
दैत्यारातिं जलधितनया शूलिनं शैलकन्या ।
इत्युद्घोषः सुखयतितरां मानसं मामकीनं
मध्यस्थानामिह मधुसुधासारसर्वस्वहारी ॥ १४८ ॥

परार्द्धप्रभो ! किं वदसि ? "गच्छतु भवानद्यैव साकमनया रथारूढो राजधानीम् । अहं तु स्वयंवरार्थमागतान् मान्यानेतान् मानयित्वा गृहीतोपहारः श्वः समागन्तास्मि" इति । तथास्तु । (शृंगाररलहरीं प्रति) अयि प्रियतमे ! त्वमद्यैव शिबिकामारुह्य गच्छ भवनम् । अहं त्वत्सखीमिमां महाराजेन सह योजयित्वा शीघ्रमागन्तास्मि । किं वदसि ? "तथास्त्वि"ति ।

(आनन्दवल्ल्या सह परिक्रम्य नाट्येन तां रथमारोप्य स्वयं चारुह्य प्रतीचीमवलोक्य)

समागत एव सन्ध्यासमयः तथा हि ।

आरभ्योदयतः स्वकीयदयितां छायां समालिङ्गितुं
श्यामां कामबलादयं करगणान् सूर्यः प्रसार्याखिलान् ।
कृत्वा तीव्रतरं च यत्नमथ तामप्राप्य शोकाकुलो
मर्तुं हा कृतनिश्चयोऽद्य सहसा मध्ये पतत्यम्बुधेः ॥ १४९ ॥

सूत ! चोदयाश्वान् । किं वदसि ? "यदाज्ञापयति भाव" इति । (रथवेगं निरूपयन्) अयि महाराजजाये ! पश्येदं शृङ्गाररसमयं विचित्रपताकाविलासललितैः केतुभिश्चित्रार्पितमेव-

दैत्यमर्त्योरगाण्डजमिथुनमनोहरकुड्यैरनेकाङ्गनासांगरागांगसङ्गमु-द्रितैस्तारकाचुम्बिताशिरोभिः प्रासादैर्जयश्रिया श्लिष्टैर्गुल्मगणैर्वशा-वशीकृतैर्मत्तदन्तिभिः कृपाणिकासंपर्कसुभगैर्भटप्रवरैरात्मसंयोगा-मोदिताशैर्धूपैः सुस्निग्धवर्त्तिकासंश्लेषप्रसन्नैः प्रदीपैर्नाजनदृ-ष्टिसंबन्धकृतार्थैस्तोरणैः स्वसङ्गसन्तोषितसकलश्रुतिभिर्वेणुवीणा-मृदङ्गादिस्वनैः क्षितितलास्तीर्णपुष्पघूर्णासङ्गसामोदैर्मन्दवातैः स-कलजननासिकासानन्दपरिगृहीतैर्मृगमदामोदैश्च मनोहरं राज-पुरम् । प्रविशाव: । (इति तां नात्रेनावरोप्य स्वयं चावतीर्य प्रविश्य वि-लोक्य च) अयि सुभगे! पश्य पश्य ।

सूक्ष्मेन्द्रोपलसूचिकाणुशकलन्यक्कारिभिः श्मश्रुभिः
स्त्रीचित्तैरिव कामपावकचलद्धूमासितैश्चुम्बितः ।
पार्श्वे स्वप्रतिबिम्बसंशयकृता मन्त्रीश्वरेणान्वितः
सेनेशेन च निर्निमेषनयनस्त्वां पश्यति क्ष्मापतिः ॥ १५० ॥

(उपसृत्य कथञ्चिदानन्दवल्लीहस्तं महाराजहस्ते विन्यस्य)

आमोद इव कस्तूर्या
भूरिवानन्तमस्तके ।
भवानस्यां सदासक्तो
भवत्येषा भवत्यपि ॥ १५१ ॥

महाराज ! किं वदसि ?

"शत्रोस्त्रिमूर्त्तिजयिनः
शम्बरमथनादहं त्वया त्रातः ।
अस्य प्रत्युपकार-
मशक्तः कर्तुं नमामि शतशस्त्वाम्" ॥ १५२ ॥

इति ।

(सलज्जं ससम्भ्रमं च) महाराज ! मा भूत्ते सक्तिरलौकिकेष्वेतेषु व्यापारेषु (स्वगतम्) अहो ! हठादयं मामुपवेशयति स्वार्द्धासने महाराजः । दीर्घबाहो ! किं वदसि ? "त्वमेव लोके भाग्यवान् । यन्मन्त्रीन्द्रेणाप्यलब्धं महाराजस्यार्द्धासनं गुरुदेवेतरैरप्राप्यं प्रणामं च लब्धवानसि" इति । मन्त्रीन्द्र ! किं वदसि ?

"यस्मिन् जीवति जीवति क्षितिरियं नानाविधैः प्राणिभि-
र्नाशोऽस्या नियतश्च यस्य विपदि त्रैलोक्यरक्षापटोः ।
सोऽयं भूमिपतिस्त्वया यदधुना कन्दर्पतो रक्षित-
स्तस्मात् सर्वजनैस्त्वमेव भुवने नन्द्योऽसि वन्द्योऽसि च" ॥१५३॥

इति

(सलज्जं क्षण स्थित्वा पुनरानन्दवर्द्धनं प्रति)

आनन्दवल्लि ! दयितासि महीवलारे-
स्त्वद्भ्रूविलासवशगाद्य मही समस्ता ।
स्मर्तव्य एष समयेषु जनो भवत्या
तन्वाङ्गि ! तावकपदं शरणं प्रपन्नः ॥ १५४ ॥

इयमिदानीमतिलज्जात्र स्थातुमप्यशक्तेव जाता । (तिर्यग्विलोक्य) अये आगच्छत्ययं पत्रहस्तश्चित्रवर्णः । (मन्त्रीन्द्रस्तावच्चित्रवर्णहस्तात् पत्रमादाय वाचयति) । "महाराजमान्यराजश्रीमन्त्रीन्द्रायाश्रितेन वसन्तमित्रेण निवेद्यमानो मङ्गळवृत्तान्तः । क इति चेत् । अस्मिन्नेव दिने बुद्धिमतां वरेण शृङ्गारसारेण वञ्चनशीलां वञ्चनेनैव विजित्य पुनर्नष्टदोषया तयैव ।

कल्याणकण्ठः कल्याण्या
तया मङ्गळमालया ।
अहं च रसमञ्जर्या
योजितौ कामपीडितौ ॥ १५५ ॥

इति ।

महाराज ! किं वदसि ? "अहो भवत्कृतानां प्रियाणां संघातः" इति । मन्त्रीन्द्र ! किं वदसि ? "भाव !

'विटराजविजय'स्त्वया कृतोऽयमतिसमीचीनः । येन सर्वजनानां महानन्दो जायते'' इति । (राजानं प्रति)

प्रागेव लब्धवानसि
जनपदपुरमन्त्रिहस्तिरत्नानि ।
स्त्रीरत्नमद्य चातः
परं तु नृपरत्न ! तेऽस्तु रतिरत्नम् ॥ १५६ ॥

(प्राचीं विलोक्य) अये सकलतरुणानां रतिसुखप्रदः प्रादुर्भवति भगवानोषधीशः पूर्वदिशः । अत्र हि—

रजतकृतं स्फटिककृतं
मुक्तामणिनिर्मितं किमु त्रिजगत् ।
इति जनशङ्काभिः सम-
मुदेति विततास्वच्छचान्द्रिकश्चन्द्रः ॥ १५७ ॥

अपि च—

आलिङ्गनायात्मकरं सरागं
प्रसारयन्तं सहजं शशाङ्कम् ।
पद्मालयालोक्य करोति पद्म-
सद्मोल्लसत्पत्रकवाटबन्धम् ॥ १५८ ॥

मन्दं मन्दं मलयमरुतो वान्त्यमी पुष्पमाला-
धारी माद्यत्पिकनिनदवानेष कालो वसन्तः ।
तारेशोऽयं लसति सविधे चेयमानन्दवल्ली
किं ते भूयः प्रियमुपहराम्यद्य भूपालमौले ! ॥ १५९ ॥

महाराज ! किं वदसि ? "नातः परं प्रियमस्ति तथापी-
दमस्तु भरतवाक्यम् ।

सज्जतु शिवशृङ्गारे
सरसा वाणी सदा कवीन्द्राणाम् ।
मुखबन्धोऽस्तु खलानां
मुक्तिदमव्याज्जगन्महः शैवम् ॥ १६० ॥

(इति निष्क्रान्तः)

शुभं भूयात् ।

# टिप्पणी ।

(१) चन्द्रार्धमौलिः मुग्धेन्दुसुन्दरः शिवः । यस्मै स्पृहयति यमभिलषति । 'स्पृहेरीप्सित' इति संप्रदानता । विटीरसः ताम्बूलरसः । इयं नान्दी सम्भोगशृङ्गारप्रधानस्य रूपकस्यानुरूपा ॥

(२) गम्भीरस्निग्धघोषः, अत एव दुन्दुभिं ताडयन्तं हरिमपि मन्दाक्षमन्दं लज्जामन्थरं रचयन् । दानधाराया मदप्रवाहस्य व्यतिकरेण संसर्गेण सुरभिः सुगन्धिः । तादृशः कर्णतालः सुखं दद्यादिति प्रार्थना गम्यते ॥

(३) स्मरान्तकः, भक्ताभीष्टदाता चेत्यविरोधः । त्रिपुरान्तकः सर्वदा सर्वमङ्गलया युक्तः ॥

(४) शात्रवलय शत्रुनाश वितन्वन् । तन्वङ्गीना रतिसुहृन् । शात्रवलयविधानमेव विवृणोति मुनीनामित्यादिना ।

(५) अयं श्लोकस्तृतीयपुरुषार्थस्य सर्वोत्कृष्टतामादरणीयतां च प्रतिपादयति ॥

(६) इय सदस्यान् प्रत्युक्तिः । घनसारः कर्पूरः ॥

सूत्रधारेण पारिपार्श्विको मारिष इति सम्बोध्यत इति रूपकाचारः ॥ भाण इति ॥

"भाणस्तु धूर्तचरित स्वानुभूतं परेण वा ।
यत्रोपवर्णयेदेको निपुणः पण्डितो विटः ॥

सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः ।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः ॥

भूयसा भारती वृत्तिरेकाङ्कं वस्तु कल्पितम् ।
मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च" ॥

इति तल्लक्षणं दशरूपके ॥

सुमनसां विदुषाम् ॥

(८) नराणामप्यधरमाधुर्यं नारीणामनुभवगोचरं इति समाधेयम् ॥

भाणं प्रयोक्तुमस्माकमुचितमिति योजनया नानुपपत्तिः । भाणशब्दस्तु पुंलिङ्ग एवेति द्रष्टव्यम ॥

यद्वोच्यते भावाय "रुच्यर्थानां प्रीयमाणः" इति संप्रदानता ॥

वैमनस्यं रसभङ्गः ॥

आरामवीथीषु उद्यानवाटिकासु । निवसन्तं अनेन तत्रत्योद्यानानां सार्वदिकः शोभातिशयो गम्यते ॥

(१०) कलिकासमुल्लासनमधुपानादिना भ्रमरसमूहैस्तरुणानां नवोढासुरतरीतिमुपदिशतीव । तदिदमवलोक्य वृक्षाः शिरःकम्पनेनानुमोदन्त इव चेत्युत्प्रेक्षाद्वितयमतिरमणीयमत्र गम्यते । मुग्धोपभोगक्रमस्तु वात्स्यायनतन्त्रे प्रपञ्चित इति तत एवावगच्छन्तु जिज्ञासवः ॥

(११) मञ्जरी शोणरजः किरतीत्यन्वयः ॥

(१३) स्निग्धाङ्गीत्यादितन्वीविशेषणानां जलकणोद्गारिणीत्यादिनर्मविलाविशेषणानां च बिम्बप्रतिबिम्बभावोऽवगन्तव्यः ॥

(१४) बहिर्गळद्वैश्यं तस्मै अवकाशं दातुमिवेति योजना । अङ्कविकासः आनन्दानुभावः ॥

(१५) आश्रि कर्तुं ॥

किं वदसि । इयमाकाशभाषितपरिपाटी ॥

मौनानुवादः 'अप्रतिषिद्धमनुमत'मिति न्यायात् ॥

(१८) अलीनां भ्रमराणां कलस्वना मधुरनादाः । अधीरं विलोकितं कर्तृ माम् अधीरभावं कुरुत इत्यन्वयः ॥

काल्यः प्रातःकालः ॥

(१९) शुकानां काकली कलरवः कङ्कणप्रणादैः सह समुद्भवतीत्यर्थः ॥

(२०) शशभृत् चन्द्रः भगिन्याः लक्ष्म्याः पुत्रस्य पुष्पधनुषः कामस्य त्रिभुवनजये महार्यं कर्म कृत्वा तां तनयविजयं वक्तुं बोधयितुमिव जलनिधिं समुद्रं प्रविशति । 'समासान्तविधेरनित्यतया' 'पुष्पधनुषः' इति कथंचिदुपपादनीयम् । संज्ञात्वेनोपपादनं तु क्लिष्टम् । दुह्याजित्यत्र ब्रूञः परिगणनाद् द्विकर्मकत्वम् ॥

(२१) ताराळिः नक्षत्रपङ्क्तिरेव हारस्तेन विवर्जिताम् । भर्तरि प्रोषिते मण्डनादिविधेर्निषिद्धत्वादिति भावः । प्रकटितसमस्ताशां तमोनाशनेन प्रकाशितसमस्तादिशं, विरहसंतापसहनाशक्त्या प्रकाशितविविधमनोरथां चेति गम्यते । तपनव्याजात् सूर्यमिषेण ॥

(२२) कालनामा यस्य पुत्रोऽपि नृणां प्राणान कलया क्षणेन हरति । पुत्रस्य विक्रम ईदृशश्चेत् पितुः कियान् स भावतीति विचार्येव युवानो मूर्छां गच्छन्ति । कामिनां हि दिवा संतापो नैसर्गिकः ॥

(२३) अम्बुजानि विकसितानि निद्रारहितानीति च । पाथोजानि पद्मानि विलसद्भृङ्गाळिकोलाहलं यथा तथा हसन्तीव । भ्रमरसमूहकलकलो हासनाद इव विजृम्भत इति भावः ॥

(२४) अधिकरं हस्ते । अहितसंघेषु शत्रुसमूहेषु, अदान्तः अकरुणः दान्तो दन्तमयः ॥

(२५) हासप्रकाशैः धवलं सूर्यं इन्दुं मत्वा पान्था मूर्छन्ति । गमितामेययामप्रियामाः कथं कथमपि यामिनीमतिवाहितवन्तः । सा हि वियोगिनामतिदीर्घा भवतीति तस्या अमेययामत्वम् । त्रियामाप्यमेययामेति विरोधोऽत्र ध्वन्यंत ॥

(२६) प्रियतमसंभावितमाणिक्यहारसदृशानां नक्षत्राणां वहनं शोभातिशयमावहतीति भावः । प्रियसमानितान्याभरणानि बहिः प्रकटयितुमेव नारीणामभिलाषो दृष्टचरः, । अतो नात्र कोपि लज्जावकाशो भवतीनामिति हृदयम् ॥

इत्याचरा भूचराः । वराङ्गं वदनम् । वलभिच्चाप इन्द्रचापः । सितहसितं धवलहासः ॥

(२८) अश्रवणेन हेतुना सख्या बधिरा जातासीति हास्यमाना । अनेन न केवलं दृष्टिः परं तु हृदयमपि चित्रपटैकतानमिति गम्यते ॥

(३०) एनामपि यो मोहयति स कामस्याप्याराधनीय एवेति भावः ॥

(३१) ममोत्तरं दातु प्रवृत्तामिव स्वसखीं दृगञ्चलेन तेनाप्रसंकेतेन रुणद्धि वारयति । कुञ्चितनतभ्रु यथा भवति तथा ॥

(३२) दूरेणन्मुखावलोकनसुखानुभवविघ्नमाचरति । भ्रूलायुर्वाञ्छतः चिरजीवितं लिप्समानस्य ॥

निगळः शृङ्खला ॥

(३७) कादम्बिनी मेघमाला । वात्या महावातः । 'कथमप्युन्नमितं न चुम्बितं तु' इत्यस्य चमत्कारमाकलयतीदं वचनम् ॥

(४१) अभिसृतशयनं पुष्पशय्यायाम् ॥

(४२) पदन्यासः सुप्तिङन्तपदरचना; पादन्यासश्च । सालंकारध्वनिं अलं-कारैर्ध्वनिभिश्च समन्वितां, भूषणरवमनोरमा च ॥

(४५) वलयध्वनिः सुरताभिलाषं बोधयितुं कृतः संकेतः । दीपनिर्वापणं तत्साधनाय रसिकेन संपादित उपायः ॥

(४६) रदनवसनं अधरः । कापि भिक्षिकादौ । एवं सुरतजनितचिह्नं निह्नुते तरुणी ॥

(४७) कोमलकमृणालगात्रीति मंजुहिः लघुनापि कारणेन क्षतसंभवं गमयति । कण्टकावलिः कालपङ्क्तिः रामावसतिश्च । फुल्लपद्ममुखीति मंजुप्या मन्यते नितरां ते पद्मिनीमादरयमुक्रमतीति योज्यते । मृणालं इह कण्टकाकुलम् । अनेनोत्तरेण तासां परीक्षितज्ञानकौशलं मन्यते । कपटमुद्रेत्यादिवचनं व्यङ्ग्यार्थमपु वाच्यतां नयति ॥

वक्रशरशलाकामित्यादि । भैषज्यतन्त्रभावितहृदयस्य कवेरनुभवसा-क्षिणीयमुपमा कमपि चमत्कारमावहति ॥

(४८) अत्र पूर्वार्द्धे अधिकोपमयपरत्वप्रशंसादोष उत्तरार्द्धे हीनोपमादोषश्च ना-शङ्कनीयः । विटवचनं तयाधिकचमत्कारहेतुत्वात् ॥

सदागतिर्वायुः ॥

(५०) स्थिरानतमना दत्तभक्तश्चेति पूर्वाभिसारः ॥

(५१) पूर्णेन्दौ ववलनाभ्रान्तिरेव पद्मसाचन्द्रादौ फालनत्वात् भ्रान्तिरपि स्वयमूहनीया । "यदद्य चानन्दु" इत्यादिवर्णनेन दिशं दर्शयति कविवरः ॥

परमार्थिष्यद्राकार ॥

(५२) तुरगपुङ्गवमधिष्ठितः अश्वतरजमारूढवान् । "अधिशीङ्स्थासां कर्म" इति कर्मत्वम् । आपतति आगच्छति ॥

कठोरकुल्यानिधिः पूर्णचन्द्रः ॥

(५५) बन्धुचक्रस्य बान्धवसमूहस्य संतापं संभ्रमं च चक्रे जनयामास ।

चण्डसेनः भयङ्करसेनापरिवृतः ॥

(५६) इत्थमन्यापदेशभाषितं गिरं विषयीकरोतीति शृण्वम् ॥

(५८) द्विजस्य पक्षिणः ब्राह्मणस्य च । कणप्रियं कणगणलोलम् ॥

(६०) अमुना नवमालिकाकरसरोरुहेण निगृहीतः धृतः बद्धश्च इति हेतोः । पद्मशब्दो यद्यपि पुंलिङ्गतया न प्रयुज्यत इत्यप्रयुक्तत्वदोषशङ्का केनापि न समुदियात् । रसानुभावसिद्धस्य कवितल्लजस्यैवंविधदोषापरिलपनं नैसर्गिकमेव । उपलभ्यन्ते हि कालिदासकृतिष्वपि प्रक्रमभङ्गादयो दोषाः । करसरसिजसंस्थमिति पाठस्तु हृद्यतरः प्रतिभाति ॥

(६१) पल्लवगणैः किसलयसमूहैः विटपैश्च । सुमनसा शोभनहृदयेन कुसुमेन च । भ्रमरकैः अलकैरलिभिश्च । आमोदः सम्मोदः परिमलश्च ॥

(६२) त्वदुदवसिते तव गृहे ॥

६४) कुम्भाभं आजानुलम्बं अधिकचलं च उदरं यस्य सः । खल्वाटः खलतिमूर्धजः । हरितदन्ततति: पीतदन्तसमूहः । नताङ्गीर्हासयन् मूर्तो बीभत्स इव तासां हासमुत्पादयन् ॥

(६५) अशनपरो भाण्डोदरो वचनशालावयवान् मोदकवस्तुभिरुपमिनोति ।

(६७) मरणभयाद्रक्षितोऽसीति योजना । 'भीत्रार्थानां भयहेतुः' इति पञ्चमी ॥

(७१) याभ्यां भुजाभ्यां धीराणां क्षितिभरसदृशे हृदये बध्नासि ताभ्या-
मतिकृशानां रम्भाणां बन्धनमनुचितम् । हरः सिंहस्य । क्षुल्लकानां क्षुद्राणाम् ।

(७२) कुसुमावली कर्णी स्वकीयसारापहारनिरतात् मधुपाननिरतान्मधुव्रतग-
णाद्भयेन हेतुना जितभृङ्गजालं कार्ष्ण्याधःकृतालिसमूहं तव केशपाशमा-
सेवितुं स्पृहयते । आर्तत्राणं महाशयानां धर्म इति तां स्वीकर्तुमर्हसीति भावः ॥

(७३) दरलसत्कुसुमावलीषु ईषद्विकसितपुष्पपङ्क्तिषु ॥

(७६) अन्धकारप्रोद्यत्सूर्येन्दुभासौ दिनपतितनयाशोणगङ्गाप्रवाहाः । कालि-
न्दी तमःकृष्णा, शोणो बालार्कसंकाशः गङ्गा चन्द्रधवलेति क्रमेण सादृश्य-
मवसेयम् ॥

(७९) दर्पकारिः कामान्तकः ॥

(८५) चञ्चद्विल्लीलतस्तनकन्दुकमिति यानक्रियाविशेषणम् । वायुर्जघनाद्वा-
सो हरति । जघनं तु जनाशयं हरति ॥

(८६) अलिकजातं ललाटभवं आनन्दजैरश्रुभिः शमितानलमुपहतवैश्वानरम् ॥

(८८) कुरस्यं गर्हणीयम् । विधृतकिटितनुः स्वीकृतवराहविग्रहः । दिधः-
क्षन् दग्धुमिच्छन् । अन्तरीक्षाभिधमधुमथनः आकाशाभिधचक्रपाणिः । दक्षि-
णेन चक्षुषा रविणा ॥

(८९) करतैः तीक्ष्णकिरणैः पाणिभिश्च । मधुपान् भृङ्गान्, मद्यपायिनश्च ॥

(९२) आचितन्यस्तत्वं चैतन्यम् । उन्नेयं अनुमेयम् ॥

(९५) पेचकी उलूकीव । गूहमाना आच्छादयन्ती । भाण्डोदरभुक्तमुक्ता-
या बन्धनशालाया अवस्थान्तरमिदम् ॥

(९७) वरिष्ठगोष्ठ्यां महत्सभायाम् ॥

(९८) 'कर्म कः स्वकृतमत्र न भुंक्ते' इति भावः ॥

(९९) अधिजिह्वं जिह्वायाम् । पादाब्जाभ्यां शपे पादाब्जावुद्दिश्य शपथं करोमि । 'श्लाघह्नुङ्'त्यादिना चतुर्थी ॥

(१००) भूरिवित्ते बहुधने पुंसि । नष्टसादः अनर्गळः ॥

वारस्त्रीणा वेश्याङ्गनानाम् ॥

सावहित्थः 'अवहित्थाकारगुप्ति'रित्यमरः ॥

(१०१) सिरालां सिराभिर्व्याप्ताम् । मत्प्रतीकस्य करयामीत्यादिं । 'अङ्गं प्रतीकोऽवयव इत्यमरः । इदं प्रहसनोचितमपि भाणे प्रयुक्तमित्यनर्गळता कविवरस्य ॥

(१०२) निसर्गरक्तस्याधरबिम्बस्य पुनरपि रक्तिमापादनमतिरागजननार्थैवेति भावः ॥

(१०३) अधरकान्ते रक्तलहरीत्वेन वर्णनं किं नाम रमणीयमित्यालोचनीयम् ॥

(१०४) उद्वेलस्यातितरां प्रवृद्धस्य । रागाब्धेरनुरागसमुद्रस्य । आस्यतो मुखात् सर्वथापि योषित एव कलभाषिण्यः यत्पूर्वश्लोकादस्य चारुता शतगुणा दृश्यते ॥

(१०५) विधिवत् वात्स्यायनोक्तविधिना । हिमवालुका कर्पूरः ।

(१०६) शोफाचितैः श्वयथुव्याप्तैः । निरङ्गुलौ व्रणगणव्याकीर्णौ च यौ हस्तौ ताभ्यां स्रवता पूयेनार्द्रीकृतं तण्डुलं समश्नाति भक्षयति ॥

साधुर्निन्देत्यादि । साधुशब्दस्य निन्दावधाभ्यामन्वयः । द्वादशात्मा । 'द्वादशात्मा दिवाकर' इत्यमरः ॥

(१०७) इनभवाः सौराश्मघृष्टयो रश्मयः अहः पापं निघ्नन्तु नाशयन्तु कीदृशा रश्मयः । विकोशतां चक्रचक्राणां चक्रवाकसमूहानां आशये मनसि विहितसुधावृष्टयः कृतामृतवर्षाः । नमत् चक्रिचक्र सुदर्शनं येभ्यस्ते । श्रितया दोषायुवतें रात्रितरुण्यास्तता विस्तृतां या तमोवेणिका तिमिरकबरी तत्संयमार्थमुद्युक्तः आरक्तो राजश्च यो दिवसाख्यवरस्य करस्तस्योद्भासिभासङ्कशङ्कामुज्ज्वलकान्तिपूरसंशयं कुर्वाणा जनयन्तः ॥

(१०८) पूर्वभूभृत्खरशिखरं, नभोगोळं चेत्यनयोः कळायसोचयोरन्योन्योत्पन्नोन्नतनभस्य विततस्य उपर्युधस्गामिभ्रान्तिमन्तर्मनांसि कुर्वाणाः । अमितततमोरूप श्यामवासः मलिनवस्त्र दहन्तः । अस्मिन् श्लोके लोहकारशालावृत्तान्तः स्फुरति ॥

(१०९) ध्वान्तसंज्ञस्य तीक्ष्णाञ्जनस्य परिकलनेन आमीलितं यदम्भोजाख्यं नेत्रं तदुन्मेषार्थं नद्रिकामार्थं अञ्जाक्षेण हरिणा राजत्कररुगरुणित यथातथोत्थिसस्य तोयौघस्य शङ्कां कुर्वाणाः । उत्प्रेक्षाहेतुरुद्गच्छन्तोऽम्बुराशेरिति । सप्ताश्वस्य भानोः । किंशुकाभाः पलाशकुसुमारुणाः ॥

विशङ्कटे विशाले ॥

(११०) गळः पाञ्चजन्यसदृशः । माणिक्यनिष्ककान्तिरधरशोभानुकारिणी । मुक्तामणिर्हरतनुधवळः । अधरकिरणः गौरीकान्तिसमः ॥

(१११) कळहंसिकाप्रियत्वेन हेमाम्बुजस्य त्वदनुसरणं युक्ततरमेवेति भावः ॥

(११२) हेम कर्तृ । तीव्र दुःखमनुभूय । महद्भिर्मत्सरो हि महानर्थहेतुः । अङ्गीकुरु 'प्रणिपातप्रतीकारः संरम्भो हि महात्मनामिति भाव ः ॥

(११४) यन्मोक्षे रशनामोक्षे ॥

कळधौतं हेम ॥

(११५) रोमावलीप्रसरदंशुमिषात् रोमराजिकान्तिव्याजेन हरिः विष्णुरपि ते जघने अस्ति । एतत्पुत्रः कामदेवः ।

सायामः गच्छामः ॥

(११६) मन्दहासितं रजतद्रवानुकारि । वेणी धूमाकृतिः । रत्नालंकाराः स्फुलिङ्गभ्रमजनकाः । तन्वी पुनर्दीपमालाभ्रान्तिहेतुः ॥

(११७) न्यक्कारी तिरस्कुर्वन् ॥

(११८) कुचकुम्भे स्तनकलशेऽधिकरणभूते । उरसिजाग्रं स्तनाग्रम् ॥

जीविकालाभात् वृत्तिलाभात् ॥

(११९) अब्धिकन्यां लक्ष्मीम् । शिलान्यस्तरेखामिव स्थिरामचञ्चलाम् ॥

(१२१) आकृष्टिराकर्षणम् । धूर्जटिधनुः शैवचापः ॥

(१२२) भयसंभ्रान्तानामङ्गनानां दृढतरमालिङ्गन हि परमानन्दहेतुः । ध्रुवं तेऽद्रौ दशाननेन कैलासे समुद्धृते ॥

(१२३) जन्यकौतुकि युद्धाभिलाषि । सैन्धवमय अश्वसंकुलम् ॥

निद्रिती सजातनिद्रो "तदस्य संजातं तारकादिभ्य इतच्" इतीतच्प्रत्ययः ॥